chapter-7

# काव्यशास्त्रेषु नायक–नायिका भेद विमर्श:

# सप्तमोऽध्याय:

# उपसंहार

सामाजिका: भास्, व्यास कालिदास, बाणभट्ट, वाल्मिकि, श्रीहर्षादि कविना काव्यम् पठित्वा आनन्दम् अनुभवन्ति। आनन्दस्य अनुभूति: एव रसा:। आनन्दानुभूति: एव काव्यस्य मुख्यम् प्रयोजनम् यद्यपि भामह:। उद्भट्ट मम्मटादि आचार्यौ: धमार्थ काम कला वैचक्षणयादि शिवेतरक्षान्यादि: च काव्यस्य प्रयोजनानि प्रतिपादितानि काव्य प्रयोजन निरूपण प्रसंगे मम्मटाचार्येण उक्तम् सकल प्रयोजन मौलिभूतम् समनन्तरम् एव रसास्वादन समुद्भूतम्। तन्मते सकलेषु प्रयोजनेषु आनंदप्राप्ति: एव मुकुटरूपेण मुख्यत्वेन विभाव्यते। काव्य फलात् यो आनंदा जायते ससाक्षात् ब्रह्मानन्दं सहोदर इव हृदयम् आनन्दयति।

काव्यस्य आनंदानुभूति ब्रह्मास्वाद सहोदरमिव काव्यस्य पठनात् श्रवणात् दर्शनात् य: आस्वादा: जायते सब्रह्मानंदास्वाद सहोदर सहोदरमिव इव अनेन सिद्ध्यति यत् रसास्वादा: एव काव्यम् सामाजिकान शुभकर्मणि कवे: काव्यम् यशप्राप्ति: धनप्राप्ति:, अनिष्ट निवारणम् करोति। व्यवहार ज्ञानाय राजादिगत् उचित आचार परिज्ञानाय चप्रेरयति। अशुभकर्मात्, शुभकर्मणि च प्रेरयति। सर्वेसाम् अलंकाकारिकाणाम् आचार्याणां मतेन काव्यस्य प्रयोजनम् एव आनंदस्य मूलम्। भामह मते धर्मार्थ धर्माऽर्थकाममोक्षेषु फलासु च कलासुच, वैचक्षण्यम् एव करोति कीर्ति प्रीतिश्च इति भुवता भामहाचार्येण प्रीतिरेव काव्यस्य मुख्यम् प्रयोजनम् प्रोक्तम्। प्रीति: विना आनन्दा: नैव जायते[1]। मम्मटाचार्येण अपि आनन्दप्राप्ति एव काव्यस्य मुख्यम् प्रयोजनम् प्रोक्तम्[2]। प्रीतिरेव काव्यस्य दशरूपककारेण धनिकनेऽपि निरतिशयेसुखास्वाद- व्यतिरिक्तम् नान्यम् काव्यस्य प्रयोजनम् नान्यत्। वक्रोक्ति जीवितकारक कुलकाचार्येणापि काव्यस्य पार्श्यन्तिके प्रयोजने आनन्द: एव मुख्यम् प्रयोजनम्। चतुर्वर्ग फलास्वादम् मययनिक्रम तदवेदान् काव्यामृत रसेनांतस चमत्कारो वितन्यते[3]। प्रीतिप्रधानस्य काव्यस्य लक्षणम् शब्दार्थौसहितौ काव्यम्[4]। इति भामहा चार्येण स्वकीय काव्यालंकारग्रंथे उपन्यस्तम् अन्येनापि आचार्यै: वामन सुदृढ, मम्मट, हेमचन्द्र विद्याधर, आदिभि: शब्दार्थयो: साहित्यलक्षणम् प्रोक्तम्।

---

[1] भामह का काव्यालकार अध्याय 1,2।

[2] मम्मटकाव्यप्रकाश 1,2।

[3] कुन्तक वक्रयक जीविनम् 1,7।

[4] भामह काव्यालकार अध्याय 1,9।

महाकविना दण्डिना शब्दार्थयो तुल्य प्राधान्य सा: मानुअर्थो सर्जनकम् शब्दप्रधानम् काव्य इति प्रोक्तम्[1]। पण्डितराज जगन्नाथेन रमणीयार्थ प्रतिपादका: शब्दा: काव्यम् इति प्रोक्तम्[2]। इदम् एव शब्द प्राधान्य प्रस्थानात् काव्यम्। काव्यलक्षण निरूपण प्रसंगे केचिन् शब्दार्थसाहित्यवादिन: केचिन् शब्दप्राधान्यावादिन: केचिन् रीतिवादिनस्य अपरे ध्वनि पश्रपाति आचार्या:। रमणीयार्थ प्रतिपादिकम् शब्दा: काव्यम् भवता पंडितराज जगन्नाथेन शब्दार्थयो: समान भावेन काव्यम् व्याप्तम् भवति। श्लोक वाक्यम् न काव्यमूइति काव्य अवयव भूतत्वेन यथा घटपटोमय वृत्ति: नघटे नवापटे पृथक्-पृथक् दृर्शयर्न अपितु घटपटोमयो: समानभावेन काव्यम् व्याप्तम् भवति। पंडितराजमते शब्दार्थाभये निष्ठत्वम् काव्यस्य नोपपद्यते परम् काव्यम् श्रुतम् अर्थौ न ज्ञाता: इति वव्वाजनीन् व्यवहारना शब्दप्रधानम् रमणीयार्थ प्रतिपादका शब्दा: काव्यम् इतिएव काव्यलक्षण समुत्पन्न भवति। तत्र काव्यत्र प्रयोजकम् रसास्वाद व्यंजकत्वम् नाम् शब्दार्थयो: समानभावेन व्याप्तम् भवति। नहि काव्यम् उच्चै: कथ्यते काव्यात अर्थो अवगम्यते काव्यम् सुतम् अर्थौ न ज्ञाता: इति विश्वजनेन व्यवहार विशेषत्वान काव्यम् सुतम् काव्यम् अवरूध्वम् इति लोकाव्यवहारस्यापि दर्शनात् काव्यम्। व्यासज्य वृत्तिधर्म: एव अवशिस्यते। तन्मते मम्मटादि प्रोक्तम् शब्दार्थ साहित्य स्वरूपम् आचार्य विश्वनाथेन शब्दार्थ सहित्यवादिन मम्मटाचार्यस्य काव्यलक्षणम् तद्दोषौ शब्दार्थौ सगुणा संमलिंकृत पून: क्वापि[3]।

इति काव्यलक्षणम् आलोचितम् तन्मते अदोषैाइति शब्दार्थ विशेषतादायकम् काव्यलक्ष्णम् इत्यस्मिन् काव्यलक्षणस्य उदाहरणे नैककारो एवमेव यदारया तस्योप्रसदा इत्यादि उतम् काव्यस्य उदाहरण प्रदर्शने विद्यायाविमर्श दोषन्वात् काव्यत्वम् एव न प्रतिभाति परंतु ब्रह्मणा निर्मितम् जमनअपि निर्दुष्टम् नास्ति। सुख-दु:खम् पापपून्यम् अमृतदिषम् दिनरात्रि: ब्रह्मणा एव निर्मितम्। अत: यत्र गुणा: भवति तत्र दोषत्वम्अपि व्याप्यतिष्ठति मम्मटस्य काव्यलक्षणे अदौषो इति काव्यलक्षण विशेषण पदौपदानेन काव्यपदप्रवृत्तिनिमित्तम् रघुवंशम मेघदूतादि प्रयणन कर्म काव्यवेपदिष्टयम् न स्यात् यथा किटानुविध्म् रत्नम् न रत्नत्वात् परिभ्रायते तथैव दोषयुक्तम् अपि काव्यम् न काव्यन्वान् परिहियते। एदोषा: काव्ये रसास्वादम् नव्यददाति ते उपेक्षा: परम् एकेनिकतुतत्व प्रवृत्योदोषा: रसास्वादान्तरायभूता सो श्रृंगारादै सर्वथा परितज्य। इति

---

1 दण्डि काव्यादर्श 1,10।
2 जगन्नाथ रसगगाधर पृष्ठ सख्या-9।
3 मम्मट काव्यप्रकाश 1,2।

लक्षणकर्तु मम्मटस्य आसयो अत्र अनुसंधिय। सगुणौ इति काव्यप्रकाशकार काव्यलक्षण घटकम् अपि पदम् न साधु विश्वनाथ मतेन परम् काव्यलक्षणेन अनेन गुणानाम् रसधर्मत्वम् अनायासे नैव अपहरितस् तम् भवति। गुणानाम् माधुर्य ओजः प्रसादानाम् रसधर्मत्वे अपि उपचारान् तदव्यंजकेषु शब्दार्थेषु आरोपाः कृतो भवति। यथा लौकिकानी कटक केयुर आदि आभूषणानि रमणिनाम् अंगान अलंर्कुवन्ति तथैव अलंकाराः काव्यस्य स्वभाव वर्धयन्तिं अनुप्रास उपमादयो अलंकाराः शब्दार्थान् उपकुर्वन्तोपि अंङ्गिनम् आत्मानम् रसम् अपि भूषयन्ति। अतः सा अलंकारतवम्।

भामहादय आचार्यः शब्दार्थ साहित्य आत्मकम् काव्य स्वरूपम् निर्मितम् तन्मते काव्ये शब्दस्य चारुत्वम् अनुप्रास यमकादिः शब्दालंकारैः अर्थस्य च चारुत्वम् उत्प्रेक्षादिभीः अलंकारैः सम्पद्यते। अतः अनुप्रास उपमादिभीः उपसकृतो रमणीयो शब्दार्थौ काव्यम् मम्मटाः शब्दार्थो काव्यम् इति वदन सालंकारस्वम् अपि स्वकीये काव्यलक्षणे उपनिब्धनाति मम्मटस्य काव्यलक्षणे चिरन्तानाम् आचार्यानाम् काव्ये परम् रमणियकम् आविर्भाति। अलंकृतौ च शब्दार्थो काव्ये परम् शोभादाद्यकम् भवति आचार्य विश्वनाथेन विभावना विशेषोदिन दर्शनात् सालंकारत्वम् अस्य ऐतेस्मिन् पद्ये प्रदर्शितम्। आनंद वर्धनस्य ध्वनि सिद्धान्ते अलंकाराणाम् स्थानम् अवरम् एव भामह उद्‌भटादिनाम् शब्दार्थसाहित्य प्रस्थाने अलंकाराणाम् एव प्राधान्यम्। काव्ये चारुत्वम् न सर्वथाअलंकार कृतम् निरलंकारस्यापि काव्यस्य मुखेन चारुत्वम् आयापि। भामहादिभीः शब्दार्थयोः सहितयोः काव्यत्वम् समाख्यातम्।

शब्दार्थो सहितौ काव्यम् इत्यत्र शब्बदार्थ लक्षणम् काव्यस्य स्वरूपम् अथको एसौ शब्दाः कश्च अर्थाः इति विवेचनियम् भवति। प्रायः शब्देन इव व्यवहाराः प्रवतन्ते। स्फोटवादिनो वैयाकरणाः शब्दस्य चतक्षोदशाः स्वीकुर्वन्ति ताश्च परापरान्ति मध्यम्। वैरवक्तया इति वैयाकरणानानाम् मते शब्दोनित्याः वेदेषु प्रणवो ब्रह्मरूपाः प्रोक्त शब्दरूपम् ब्रह्म प्रणवो पर्यायम् गो शब्दात् प्रथमम् गोपद स्फोट जानम् पश्चात् च गोतौरूपेणो अर्थस्य अवगतिः जायते। एवम् नित्यः शब्दो अर्थभावेन विवर्तमानाः सदृश्यते परम् पारमार्थिकम् शब्दस्य नित्यत्वम् निरुपाधि ब्रह्मवद इति गहनातिगहनम् शब्दस्वरूप विवेचन परम् दर्शनम्।

मीमांसका: अपि नैयादिकानाम मते शब्दो नश्वर: ध्वनि रूपा:। मीमांसकानाम् मते शब्दोभित्य: वेदम् अपौरूषिदम् नित्यम् च मन्यन्ते। वैशकेकै: शब्दार्थयो सामायिका संबंधा: मन्यन्ते। तन्मते शब्दार्थयो: संयोग संबंधेन अवस्थानम् उतसंबन्धेन उतसमवाय संबन्धेन तन्मते शब्दो धटपनादिरूपो मुखोच्चारितो ध्वन्यात्मा आकाशस्य गुणस्यत् तद्बोध्यो घटकटपटत्व रूपो अर्थो दृव्यम्।

कथम शब्दो जायते किञ्च शब्दस्य स्वरूपम् इति परम् ब्राह्मण दर्शनाम् भारतीय दर्शन शास्त्रे शब्दार्थयो: स्वरूपम् तयो: संबन्ध विषये परमगहनो विचार: प्रदर्शिता काव्ये अपि परमान्द सहोदरस्य रसस्य चर्वणा शब्दार्थ पूर्वम् एव भवति। शब्दोच्चारणान् मूलाधार चक्रस्था: स्पंदशून्या: सूक्ष्मातिसुक्ष्मा पवन संस्कारो प्रस्फुटिटो भवति। अयम् नाद् ब्रह्मरूपेण ज्ञायते। मूलाधार चक्रस्था: पवन संस्कार रूप: शब्द: अखंड: अविभाज्यो विभूश्च। एतद् एव योगीनाम् सामाधौ निर्विकलयक ज्ञानविषय: इति उच्यते। वैयाकरणानाममते शब्दो नित्या: विस्फोटेन व्यक्ता: कर्ण संस्फुरी ग्राह्यो असौ ध्वनिरूप: यथा गौ शब्दोच्चारणात् पूर्वम् अव्यक्ता: सूक्ष्मा: शब्दो नित्या: नैयायिकानाम मते शब्दो स्वरो ध्वनि रूपा: मिमांसकानाममते शब्दो नित्या: 32 शब्दस्य सातया: अपि त्रिविधा अभिधा, लक्षणा व्यंजना च अभिधा शब्दस्य प्रथमा मूख्यार्थ विषयणीशक्ति उक्तम् च मम्मटाचार्येण समुख्या अर्था: तत्र मुख्यो व्यापारो अस्या अमिधा उच्यते। संकेतिता अर्था: एव मुख्यार्थ मुखम् इव मुख्या: यथा इस्य पादादिभ्या इन्द्रियभ्या पूर्वम् मुखम् व्यक्तम् भवति। तथा लक्ष्य व्यंग्यार्थे पय: पूर्वम् शब्दस्य यो अर्थ: गृह्यते येन शब्देन मुख्यो अर्था: अविधीयते। वाचक शब्दार्थ वाच्यम् अर्थम्, बोधयति सप्तस्य शक्ति अभिधा इति। अभिधीयते अनया शक्तिया शब्देन अर्था अर्थेनवा शब्दा: अभिधाशक्तिविधि इयम् अभिधा केवला समुदाय अवयव शक्ति संकरस्य। अभिधाया: पृच्छभूता लक्षणा शक्ति इति यत्र अभिधा शब्दस्य स्वाभाविकी शक्ति: तत्र लक्षणा स्वाभाविकी केतना शक्ति: अभिधा शब्दस्य आद्या सहजा शक्तिरिति परम् लक्ष्णा यान् अर्थान् लक्षयति तन्नाम् लक्षणा यथा गंगापदस्य प्रवाह रूपो अर्था: शक्ति लभ्या: संकेतरूपा: परम् तटरूपो अर्था: प्रवाह रूपो शक्त्यार्थ संबंधेन संबंधो न मुख्या: साहजोअर्था:। परंपरा संबंधेन प्राप्यते। एवम् लक्षणाया: त्रीणिनिबंधनानि सन्ति। प्रथमम् मुख्यार्थ बाधात्मकतम् निबंधनम् द्वितीयम् मुख्यार्थ लक्ष्यार्थ यो: पारस्परित संबंधात्मक पितृम् निबंधनम् रूढि प्रयोजनम् वा इति लक्षणाम् प्रति तृतीयम् निबंधनम्।

व्यंजनाया: स्वरूपम् नायक-नायिका भदेविमर्श: वस्तुत: रसनिष्पत्ते: मुख्यो आधार रसनिष्पत्ति प्रक्रियायाम् नायक-नायिका आलंबन आश्रय रूपेण सहायभूता भवन्ति विभाव अनुभाव व्यभिचारीभाव संयोगेन सरनिष्पत्ति: भवति। ध्वनिकारमते रसा: न कदापि वाच्य: सदा व्यंग्य रूपो भवति। अत: अभिधा व्यापार: वाच्य विषयक: लक्षणा व्यापार: लक्ष्यविषयक: व्यंजना व्यापारा: व्यंग्य विषयक: भवन्ति। अत: अभिधा व्यंजना अभिधा लक्षणा परम्। व्यंजनाया: विवेचनम् अत्र: आवश्यकम् वर्तते। उक्तम् च आचार्यै: वाच्यार्था लक्ष्यार्थ अतिरिक्त द्वितीय मानार्थ प्रतिपादिका शक्ति व्यंजना नाम् प्रतीयमानव अर्थ एव व्यंग्यार्था: व्यंजनाया: विषया: प्रतिपमानस्य अर्थस्य प्राधान्येन वा अप्राधान्येन काव्यस्य उत्तम् मध्यम्, अधम् भेद प्रकर्णम् निष्पन्नम् भवति।

कस्य वा न भवति रोषो दृष्ट्वा प्रियाया: सव्रणमधरम्।
सभ्रमरपद्माघ्राणशीले वारितवामे सहस्वेदानीम्।।[1]

अत्र वाच्यप्रतीयमानौ द्विविधावर्थौ प्रतीतिपथमवतरत:। तत्र वाच्योऽर्थो नायिकाया: विषय:। प्रतीयमानोऽर्थश्च तद्भर्तृविषय:।

व्यञ्जना द्विविधा। शाब्दी व्यञ्जना आर्थी व्यञ्जना चेति। यथोक्तं गोविन्दठक्कुरमहाभागै:-

**अथ व्यञ्जकशब्दलक्षणाय व्यञ्जना निरूपणीया। सा च द्वेधा। शब्दनिष्ठा अर्थनिष्ठा च।**[2]

## (1) शाब्दी व्यञ्जना

शब्दनिष्ठा व्यञ्जना शाब्दी। शाब्द्यां व्यञ्जनायां शब्दस्यैव प्राधान्येन व्यञ्जकत्वम्। यदि व्यञ्जकं शब्दं परिवर्त्य तत्पर्यायान्तर: शब्द: प्रयुज्यते, तर्हि व्यङ्ग्यार्थस्याप्रतीतौ शब्दस्य व्यञ्जकता सर्वथा त्रुट्यति। अत: परिवृत्तिं पर्यायशब्देन

---

[1] तत्रैव, पृ 76।
[2] पण्डितदुर्गाप्रसाद, गोविन्द-काव्यप्रदीप, पृ 49।

परिवर्तनमसहिष्णोः शब्दस्य सद्भावे व्यङ्ग्यार्थोल्लासात्तदभावे च तदननुभवाच्छब्दमवलम्बमाना व्यञ्जना शाब्दी। नहि शाब्द्यां व्यञ्जनायां व्यञ्जकशब्दय तत्पर्यायवाचिशब्दान्तरेण विपर्यये कृते व्यङ्ग्यार्थस्य प्रतीतिः। नियतः परिवृत्तिमसहमान एव शब्दोऽत्र व्यञ्जकः। अतो व्यञ्जकता सर्वथा परिवृत्यसहशब्दायत्तति कृत्वा शब्दनिष्ठा व्यञ्जना शाब्दीति व्यपदिश्यते।[1] तद्यथा-

**भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य।**
**यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत्।।**[2]

इत्यत्र भद्रकरादयश्शब्दा यथाश्रुतगृहीताः कल्याणपाणीत्यादिभिः पर्यायशब्दैः परिवर्तनमसहमाना गजरूपिणमर्थमभिव्यञ्जन्ति, नतु विपर्ययिणेतिकृत्वा नियतानां परिवृत्तिमसहिष्णूनां शब्दानां व्यञ्जकत्वे शब्दस्य व्यञ्जना शाब्दी। अयमाशयः। पूर्वोक्ते पद्ये भद्रादयश्शब्दा नृपगजरूपी द्वावर्थौ बोधयतः। तत्र नृपपक्षे राजाऽयमुच्चान्वयः, शत्रुभिरप्रधर्ष्यः सततं दानादिभिः परेषामुपकारक इत्यर्थः। गजपक्षे च भद्रजातीयोऽयं हस्ती गण्डस्थलनिष्यन्दिमदपिपासुभिर्भ्रमरकुलैः परिवृतोऽत्युच्चो बलिष्ठश्चेत्यर्थः। अत्र भद्रादीनां शब्दानां परिवर्तनं कृत्वा तत्स्थाने कल्याणादिपर्यायशब्दा यदि प्रयुज्येरन्, तदाऽनयोर्द्वयोरर्थयोः प्रतीति र्व्याहन्येत। एवं परिवृत्तिमसहमानैः भद्रकरादिपदैरेवात्र नृपगजरूपिणोरर्थयोः गजरूपिणोऽर्थस्य प्रतीतिरप्राकरणिकी। आद्योऽर्थः प्राकरणिकत्वादभिधया बोध्योऽन्त्यश्च व्यञ्जनया। व्यञ्जनात्र कल्याणादिपर्यायपदपरिवृत्तिमसहमानैर्भद्रादिपदैर्गजरूपिणमर्थं ध्वनयतीति कृत्वा शब्दनिष्ठा शाब्दीति व्यपदिश्यते।

शाब्दी व्यञ्जनापि द्विविधा। अभिधामूला लक्षणामूला चेति।[3]

### (क) अभिधामूला शाब्दी व्यञ्जना

अभिधा मूले यस्याः सा अभिधाश्रिता व्यञ्जना अभिधामूला। अभिधामूलेति नामकरणे बीजद्वयम्। प्रथमं बीजं तावत् नानार्थशब्दस्थले प्रथममभिधा

---

[1] शब्दस्य पर्यायपरिवृत्यसहत्वाच्च शाब्दत्व व्यञ्जनाया बोध्यव्याम्। अभ्यङ्कर, वासुदेवशास्त्री, मम्मट-काव्यप्रकाश., उद्योतटीका, पृ. 62।

[2] करमकर, रघुनाथदामोदर, मम्मट-काव्यप्रकाश, पृ 62।

[3] अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा। -विश्वनाथ, साहित्यदर्पण, 2, 13।

प्राकरणिकमर्थमभिदधाति, अनन्तरञ्चाभिधायां प्रकरणादिप्रतिबन्धकसामग्रीवशात् प्राकरणिकेऽर्थे नियंत्रितायां सत्यां तत्रैव परिस्फुरन्तमप्राकरणिकमर्थमभिव्यञ्जयितुं व्यञ्जनावतरति। एवमभिधायाः प्राकरणिकेऽर्थे नियंत्रणात्, अप्राकरणिकमभिधाऽशक्यसमर्प्यमर्थमवगमयितुं व्यञ्जनाघ्रिं निदधातीत्यभिधानन्तरभावित्वात्तस्या अभिधामूला व्यञ्जनेति व्यपदेशो युक्तः। द्वितीयं बींज हि नानार्थशब्दस्थले प्रतीतिपथमवतीर्णा उच्चावचा अर्था अभिधेया एव, नानार्थकानां शब्दानां तेषु सङ्केतात्। यथा हरिरिति नानार्थकश्शब्दो विष्णुिवानरादिषु नानार्थेषु गृहीतसङ्केतः।[1] अतो विष्णुवानरादयोऽभिधेयार्थ हरिरिति पदस्य। परं प्रकरणादिप्रतिबन्धकवशान्नानार्थकानां शब्दानां शक्तिः प्राकरणिकेऽर्थे नियंत्रिता भवति। अतोऽनेकार्थकस्य शब्दस्य सङ्केतितान्नानार्थान् बोधयितुं क्षमाप्यभिधा प्रकरणादिप्रतिबन्धकनिगडीकृता तानर्थान् बोधयितुं न खलु पारयति। तत्राप्राकरणिकमर्थं प्रतिबन्धकसामग्रीशृङ्खलीकृतया अभिधया अशक्यसमर्प्य व्यञ्जना द्योतयति। अतो व्यञ्जना अभिधेयार्थमेवाभिदधाति, योऽसावर्थः प्रकरणादिप्रतिबन्धकसामग्रीवशान्नाभिधाबोध्यः। इत्थं योऽर्थोऽभिधया प्रतिपाद्यः स एवार्थो व्यञ्जनया बोध्यते इति कृत्वाऽसावभिधामूलेत्युच्यते। अतोऽभिधानन्तरोत्थानात् प्रकरणनिरुद्धस्याप्यभिधेयस्यैवार्थस्य च प्रत्यायनादिति द्वाभ्यां बीजाभ्यां शाब्दी व्यञ्जना अभिधामूलेति। तल्लक्षणं यथा-

**अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।**
**एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया।।**[2]

अयमाशयः। भतृहरिणा स्वकीये वाक्यपदीये-
**संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**
**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।।**
**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।**
**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।।**[3]

---

[1] यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु।
शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु।। - अमरसिंह, अमरकोष, 3, 175।
[2] विश्वनाथ, साहित्य-दर्पण, 2, 14।
[3] (क) भर्तृहरिः, वाक्यपदीयम्, 2, 317।
(ख) मम्मट- काव्यप्रकाश, 2, 29 (ग) पण्डितशिवदत्त हेमचन्द्र - काव्यानुशासनम. पृ.39,

संयोगादयोऽनेकत्रगृहीतशक्तिकानां हरित्यादीनां पदानामेकस्मिन्नर्थे नियामका: प्रोक्ता:। तेन नानार्थकोऽपि शब्द: प्राकरणिकमेवार्थमभिदधाति, नाप्राकरणिकम् तद्यथा सशङ्खचक्रो हरिरित्यत्र संयोगे प्रतिबन्धके जागरूके सति नानार्थकस्यापि हरिशब्दस्य शक्तिर्विष्णुरूपिण्यर्थे एकत्र नियमिता। शंङ्खचक्रयोर्विष्णुना सहैव सम्बन्धान्नायेन वानरदिना सह। अत: संयोगेनियंत्रित शक्तिको नानार्थकोऽपि हरिशब्दो विष्णुरूपिणमर्थमेवाभिदधाति, रामशब्दस्य शक्ते: साहचर्यात् राघवरूपिण्यर्थे नियंत्रणात्। एवमनेकत्रगृहीतशक्तिकानामपि पदानां शक्ति: संयोगादिषु प्रतिबन्धकेषु जाग्रत्सु सत्सु प्रकारणिकार्थेतरमर्थं सङ्केतितमपि बोधयितुं न प्रगल्भते। प्रत्युत संयोगादिभि: प्रतिबन्धकैर्नियन्त्रिताया अभिधाया: प्राकरणिकार्थप्रत्यायने एवोपक्षय:। अत एवंविधेषु स्थलेषु या अप्राकरणिकार्थप्रतीति: सा शक्तिभिन्नेनान्येन व्यापारेणैव निर्वाह्या। स एवाप्राकरणिकार्थबुबोधयिषुर्व्यापारो व्यञ्जनाऽभिधामूला। तद्यथा-

**दुर्गालङ्घितविग्रहो मनसिजं सम्मीलयंस्तेजसा**
**प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभि:।**
**नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रूचिं धारयन्**
**गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभ:।।**[1]

इत्यस्मिन्नुदाहरणे प्रकरणवशान्नार्थकानां दुर्गभोगिविभूत्यादीनां पदानां शक्तिर्वर्ण्ये भानुदेवरूपिण्यर्थे नियंत्रिता। तेन चानेकत्र गृहीतशक्तय: अयीमे शब्दा 'भानुदेवनृपोऽद्भुतपराक्रमशाली, रूपेण कामदेवमप्यतिशयान:, स्वाधीनीकृतनृपमण्डल:, भगवतो महादेवस्य परमो भक्त' इत्यमुमेवार्थमभिधाय कृतकृत्या:। परमेभिरेव शब्दै: परिवृत्तिमसहमानै:, 'पार्वतीवल्लभश्चन्द्रभूषणो विभूतिविभूषितशरीर: परमेश्वरो महादेव' इत्यर्थोऽपि सहृदयानां प्रतीतिपदवीमधिरोहित। नायमपरोऽर्थो महादेवरूप: अभिधया प्रतिपाद्य:। तस्या: प्रकृते भानुदेवनृपरूपिण्यर्थे संयोगादिवशान्नियंत्रितत्वात्। यद्युभावर्थौ प्राकरणिकौ स्यातां तर्हि संयोगादिप्रतिबन्धकाभावे अभिधाबोध्यत्वं तयोरुपपद्येत। परं यत्र प्राकरणिकेन सहाप्राकरणिकस्याप्रस्तुतार्थस्य प्रतीतिरुदेति तत्र व्यापारान्तरमभ्युपेयम्। न ह्यशक्त: शब्द: कदाप्यर्थं बोधयितुं प्रभवति। शक्तिश्चाभिधा। सा च नियंत्रिता प्रकृतेऽर्थे

[1] शिवदत्त, विश्वनाथ-साहित्यदर्पण, (बम्बई सस्करण) पृ 69।

भानुदेवरूपे संयोगादिना प्रतिबन्धकेन। नापि च लक्षणा, मुख्यार्थबाधादिसहकारिसामग्र्यभावात्। अतो यद्व्यापारान्तरमवशिष्यते, तद्ध्वननमेव।[1] दुर्गभोगिभूत्यादीनां पदानां परिवृत्यसह- त्वात् तदवस्थेभ्य एव तेभ्यो महादेवरूपिणोऽर्थस्य ध्वननात्, तत्र भवन्त्या व्यञ्जनाया: शाब्द्यभिधामूलेति नामकरणं सर्वथा युक्तियुक्तम्।

नानार्थकेभ्यश्शब्देभ्योऽभिव्यक्त: प्राकरणिकार्थेतरोऽर्थो द्विविध:। वस्तुरूपोऽलङ्काररूपश्चेति। वस्त्वात्मकेऽर्थे व्यङ्ग्ये सति वस्तुव्यङ्ग्या अभिधामूला शाब्दी व्यञ्जना, अलङ्काराणामुपमादीनाञ्च ध्वनने सत्यलंकारव्यङ्ग्याऽभिधामूला शाब्दी व्यञ्जना। यथोक्तं मम्मटेन-

**अलङ्कारोऽथ वस्त्वेव शब्दाद्यत्रावभासते।**
**प्रधानत्वेन स ज्ञेय: शब्दशक्त्युद्भवो द्विधा।।**[2]

**वस्तुव्यङ्ग्या अभिधामूला शाब्दी व्यञ्जना**

परिवृत्यसहैर्व्यञ्जकै: शब्दैर्वस्तुरूपिणोऽर्थस्य व्यङ्ग्यत्वे वस्तुव्यङ्ग्या अभिधामूला व्यञ्जना। तद्यथा-

**पथिक नात्र स्रस्तरमस्ति मनाक् प्रस्तरस्थले ग्रामे।**
**उन्नतपयोधरं प्रेक्ष्य यदि वससि तदा वस।।**[3]

अत्र नानार्थकस्य पयोधरशब्दस्य शक्तिर्मेघरूपिण्यर्थे नियंत्रिता। अत: स्तनरूपोऽर्थोऽत्र व्यञ्जनया प्रत्याय्य:। तेन च यद्युपभोगक्षमोऽसि। तदाऽऽस्व इति वस्त्वात्मा व्यंग्योऽर्थ: परिस्फुरति। अयमाशय:। अत्र काचितरूणी प्रावृट्समये पथिकं कञ्चन ग्रामागतं वदति यदिस्मन् ग्रामे कटाद्यास्तरणानामभाव:। अतो ग्रामोयं न वासयोग्य:। परं तथापि वियति मेघान् दृष्ट्वा धारासम्पातवृष्टिशङ्कया यदि तवात्र विश्रामेच्छा तदा विस्रब्धं विश्रम्यताम्। अयमर्थ: प्राकरणिकोभिधाबोध्य:। पयोधरादीनां

---

[1] अत्र हि शब्दद्वयकल्पने कथ प्रकृतार्थस्य प्रथम प्रतीति द्वयोरभिधेयत्वेन पुर्वपश्चाद्भावनैयत्यासम्भवात्। किञ्च द्वितीयार्थ बोधने धर्मिकल्पनातो वर धर्मकल्पनेति भिन्नशब्दकल्पनात् भिन्नैव व्यञ्जनाख्या वृतिरङ्गीकर्तुभुचिता। शिवप्रसादभट्टाचार्य., मम्मट-काव्यप्रकाश., काव्यप्रकाशदर्पणटीका, पृ 48।
[2] करमकर, दामोदररघुनाथ., मम्मट-काव्यप्रकाश, पृ 128।
[3] तत्रैव, पृ. 133।

पदानां शक्तेर्मेघाद्यर्थे नियन्त्रणात्। अनन्तरं शब्दशक्तिमूलध्वनिमहिम्ना परिवृत्यसहैः पयोधरादिभिः पदैः प्रवृद्धमदनकातर्यायाश्चौर्यरतलुब्धायाः कस्याश्चिदविनयवत्या उपभोगविषयोऽभिलाषो व्यंग्यो तस्तुरूपोभिव्यक्तो भवति। अस्मिन् ग्रामे मूर्खाणां ग्रामीणानां शास्त्रादिज्ञानं नास्ति, अतोऽनुपभुक्तौ कामिजनमन्थथोज्जृम्भकौ ममोन्नतौ कुचकुम्भौ दृष्ट्वा यदि कामुकोसि, तदोपभोगार्थ त्वयाऽश्यमेवात्र स्थातव्यमित्यर्थो ध्वनितो भवति। अयमर्थो वस्तुरूपः परिवृत्तिमसहिष्णुभिः पयोधरादिपदैरेवाभिव्यक्तो भवति। तद्विपर्यये मेघादिशब्दप्रयोगे तादृशार्थास्फुरणात्। अतोऽत्र शाब्दी वस्तुव्यंग्याभिधामूला व्यञ्जना स्फुटा।

HANSA MEHTA LIBRARY

### अलङ्कारव्यङ्ग्या अभिधामूला शाब्दी व्यञ्जना

परिवृत्तिमसहमाना अनेकत्र ग्रहीतशक्तिकाः शब्दाः यदा अभिधाव्यञ्जनाभ्यां प्राकरणिकाप्राकरणिकोभयविधमर्थ बोधयन्ति, तदा विभिन्नयोरनयोरर्थयोः सम्बन्धः कश्चिदवश्यं कल्पनीयः, अन्यथाः असम्बद्धार्थाभिधानदोषप्रसंगाः। असौ सम्बन्ध उपमोत्प्रेक्षालंकाररूपः। तेन प्राकरणिकाप्राकरणिकयोरर्थयोः परस्परमुपमेयोपमानभावेनावस्थानान्नासम्बद्धार्थदोषप्रसङ्गः। एवं नानार्थे केभ्यः शब्देभ्योऽलंकाराणां व्यंग्यत्वे सत्यलंकारव्यङ्ग्या अभिधामूला शाब्दिव्यञ्जना भवति। तद्यथा-

**उल्लास्य कालकरवालमिवाम्बुवाहं देवेन येन जरठोर्जितगर्जितेन।**
**निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः।**[1]

इत्यत्रानेकत्र गृहीतशक्तिकैर्देवादिपदैः नृपदेवेन्द्ररूपिणोरर्थयोः प्रतीतिः। तत्र नृपरूपोऽर्थः प्राकरणिको देवेन्द्ररूपश्चाप्राकरणिकः। प्राकरणिके नृपबर्णनप्रसङ्गे कालकरवालादीनां पदानां शक्तिः संयोगादिभिः प्रतिबन्धकैः कृपाणाद्यर्थेषु नियम्यते। निगडिताया अभिधायाः पुनरुत्थातुमशक्यत्वादेभिदेव पर्यायान्तरमसहिष्णुभिः पदैरप्राकरणिकदेवेन्द्रार्थसम्बद्धानां मेघाद्यर्थानां प्रतीतिर्ध्वननशक्तिमहिम्ना। अनन्तरमप्राकरणिकस्येन्द्रदेवरूपिणोऽर्थस्य प्राकरणिकेन नृपरूपेणार्थेन सह सम्बन्धोपि कश्चिदन्वेष्टव्यः। अन्यथा देवेन्द्ररूपः अर्थोऽसम्बन्धत्वाद्धेय एव स्यात्।

---

[1] करमकर, दामोदररघुनाथ, मम्मट-काव्यप्रकाश, पृ 129।

सम्बन्धश्चात्रोपमानोपमेयरूप:। तथा सति महेन्द्र एवायं राजेति नृपमहेन्द्रयोरभेदात् रूपकालङ्कारस्य घण्टान्यायेन् ध्वननाद् गुणोऽधिक:। रूपलङ्कारश्चात्र व्यङ्ग्य एव, महेन्द्र एवायं राजेति स्वशब्देनानावेदनात्। एवमिन्द्रादिपर्यायान्तरपदमसहमानैर्देवादिपदै रूपकालङ्कारस्य ध्वनने कर्त्तव्येऽलङ्कारव्यङ्ग्घ्या अभिधामूला शाब्दी व्यञ्जनात्र सूरिभिर्विभाव्या।

**(अ) अभिधामूलाया: शाब्द्या व्यञ्जनाया विषये आनन्दवर्धनाचार्यस्यमतम्**

आनन्दवर्धनाचार्येण शाब्द्या अभिधामूलाया व्यञ्जनाया लक्षणमित्थुमुपनिबद्धम्-

**आक्षिप्त एवालङ्कार: शब्दशक्त्या प्रकाशते।**
**यस्मिन्ननुक्त: शब्देन शब्दशक्त्युद्भवो हि स:।।**[1]

अयमाशय:। यत्र परिवृत्यसहशब्दसामर्थ्येनालंकारान्तरं व्यङ्ग्यं स्वशब्दानावेदितं सत् प्रकाशते, तत्र शब्दशक्तिमूलो ध्वनि। यत्रालङ्कारस्य न प्रतीयमानता, प्रत्युत अभिधानशक्त्या वाच्य: सन् साक्षादलङ्कारोऽभिधीयते, तत्र न ध्वनिरपितु श्लेषादयो वाच्यालङ्कारा:। एवमानन्दवर्धनाचार्यमते अलङ्काराणां प्रतीयमानतायामेव शब्दशक्तिमूलो ध्वनि:। तद्यथा-

**उन्नत: प्रोल्लसद्धार: कालागुरुमलीमस:।**
**पयोधरभरस्तन्व्या: कं न चक्रेऽभिलाषिणम्।**[2]

अत्र केनचिदनुरागिणा व्यामोहितेन कस्याश्चिद् हृदयवल्लभायास्तरुण्या रत्नहारविभूषित कालागुरुलेपननीलं मन्मयोज्जृम्भकं कामिजनसर्वस्वायमानं कुचकुम्भयुगलं प्रशस्यते। सुन्दरीकुचकलशरूपोऽर्थोऽभिधया समुपस्थाप्य:। एभिरेव पदै: प्रावृण्मेघरूपोर्थोऽपि प्रस्फुटति। अत्र स्तनमेघयो: परस्परं या रूपणा उपमारूपकादीनामलंकाराणां प्रसवित्री, असावनभिधेया व्यङ्ग्यत्वेनैव भाति, चमत्कृतिञ्चातनोति। एवं मेघस्तनरूपिणोरर्थयो: प्रतीतिरभिधया भवेन्नाम, परं द्वयोरर्थयोर्या रूपणा सा त्वनभिधेयत्वाद् व्यङ्ग्यैव।

[1] शास्त्री, पण्डितपट्टाभिराम, आनन्दवर्धन-ध्वन्यालोक, 2, 21।
[2] तत्रैव, पृ 242।

अनेनेदमायाति यदानन्दवर्धनाचार्येण नानार्थकेभ्य: पदेभ्य अलंकाराणामेव व्यंग्यत्वे शब्दशक्तिमूलो ध्वनि: सम्प्रतिपन्न:। यदि वस्तुरूपिणोऽर्थस्य प्रतीतिस्तदा न ध्वनिस्तत्र श्लेषाद्यलंकारा वाच्या:। नानार्थशब्दस्थले उपमानोपमेयभाव उपमोत्प्रेक्षादीनां प्राणभूत: सर्वदाऽनभिधेय:। वस्तुरूप: प्राकरणिकोर्थस्तु शब्दस्य स्वार्थ एव। परमलंकाराणां गोप्यमानतया परिस्फुरणात् तद्वैपरीत्ये वस्तुरूपिण: प्राकरणिकार्थस्य च साक्षादभिधेयत्वाच्छब्दशक्तिमूलो ध्वनि: सर्वदाऽलङ्काररूप एवाचार्यानन्दवर्धनमते।

इत्थं पूर्वोदाहृते पद्ये पयोधरेत्यादिपदै: प्रौक्तौ स्तनमेघरूपिणौ द्वावर्थावभिधेयावेव शब्दानां तत्र सङ्केतात्। परं स्वशब्दावेदितोऽभिधेयोऽपि मेघरूपोऽर्थो न स्वात्मनि विश्रान्तिं भजते, प्रत्युतोपमानभावेनावतिष्ठमान: स्तनरूपेणार्थेन सह रूपणामुपगच्छन् वाक्यार्थं बुभूषयन् रूपकालंकारस्य व्यङ्ग्यत्वे निबन्धनमुपवाति। यदि तन्व्या: कुचकुम्भरूपार्थप्रतीत्युत्तरमनुभूयमानो मेघरूपोऽर्थोऽभिधेयोऽसम्बद्ध एव तदा परिहेय एव स्यात्। अतोसम्बद्धार्थाभिधानमेवंविधेषु प्रसङ्गेषु मा भूदिति कृत्वा नानार्थकपदलभ्ययोरर्थयो: सम्बन्ध: कश्चित् कल्प्यते। असौ च न स्वशब्दाभिधेय:, परं व्यङ्ग्योलंकाररूप:। अयमलंकारो व्यङ्ग्य: सर्वदा नानार्थवद्भि: पदैरेव परिस्फुरति, अत: शब्दशक्तिमूल:।

एवमानन्दवर्धनाचार्यमते शाब्दी व्यञ्जनाऽलङ्कारव्यङ्ग्यैव। वस्तुरूप: अप्राकरणिकोऽर्थ: शब्दानां तत्र साक्षात् सङ्केतादभिधेय एव। तथा सत्यलङ्काराणां व्यङ्ग्यत्वे शब्दशक्तिमूलो ध्वनि:। वस्तुरूपार्थप्रतीतौ तु श्लेषाद्यलङ्काराणां विद्यमानत्वे न शब्दशक्तिमूलो ध्वनि:।[1]

### (आ) अभिनवगुप्तपादाचार्यमतम्

आन्नदवर्धनाचार्यव्यवस्थापितं शब्दशक्तिमूलध्वलङ्काराणां व्यङ्ग्यत्वं न कस्यापि विमतिपदपतितम्। परं वस्त्वात्मनोऽर्थस्यापि व्यङ्ग्यत्वमिति दिगभिनवगुप्तपादाचर्येणैवादावुत्सूत्रिता । तथाहि -

[1] यस्मादलङ्कारो न वस्तुमात्र यस्मिन् काव्ये शब्दशक्त्या प्रकाशते, स शब्दशक्त्युद्भवो ध्वनिरित्यस्माक विवक्षितम्। वस्तुद्वये च शब्दशक्त्या प्रकाशमाने श्लेष । -शास्त्री, पण्डितपट्टाभिराम, आनन्दवर्धन-ध्वन्यालोक, पृ 235।

**अत्रान्तरे कुसुमसमययुगमुपर्संहरन्नजृम्भत ग्रीष्माभिधानः फुल्लमल्लिकाधवलाट्टहासः महाकालः ।**[1]

इत्यत्रानेकत्र गृहीतशक्तिकेभ्यो महाकालादिपदेभ्यो ग्रीष्मर्तुभीषणदेवतारूपिणोर्द्वयोरर्थयोः प्रतीतिः। ग्रीष्मर्तुवर्णनप्रसङ्गे महाकालपदस्य ग्रीष्मर्तुरूप्यर्थः प्राकरणिकः। भीषणदेवतारूपश्चार्थोऽप्राकरणिकः। अत्रानन्दवर्धनाचार्या भीषणदेवतारूपोऽप्राकरणिकोऽर्थोऽसम्बद्धो न स्यादिति कृत्वा प्राकरणिकाप्राकरणिकयोरर्थयोरुपमानोपमेयभाव परिकल्प्य रूपकादीनामलंकाराणां व्यङ्ग्यत्वं सिद्धान्तयन्ति।

परमभिनवगुप्तपादाचार्याणां मते अप्राकरणिकोऽर्थो भीषणदेवतारूपोपि व्यङ्ग्य एव। तथाहि- महाकालादीनां पदानां शक्तिर्ग्रीष्मर्तुरूपिण्यर्थे नियन्त्रिता। ग्रीष्मर्तुवर्णनप्रसङ्गे प्रयुक्तानि महाकालादीनि नानार्थकानि पदानि प्रकरणमहिम्नैकस्मिन्नर्थे नियन्त्रितशक्तीनि। अतस्तानि प्राकरणिकार्थेतरमर्थमभिधातुं नैव पारयन्ति। एतादृशेषु स्थलेषु अप्राकरणिकस्य भीषणदेवतारूपिणोऽर्थस्य प्रतीतिर्नाभिधया, तस्याः प्राकरणिकेऽर्थे नियन्त्रणात्। अतोऽप्राकरणिकोर्थो व्यञ्जनया द्योत्यः सन् व्यङ्ग्य एव स्वीकरणीयः।[2]

अनेनेदमुन्नीयते यद् वस्त्वात्मनोऽर्थस्यापि व्यङ्ग्यत्वमुपपन्नमभिनवगुप्तमते। तेन शाब्द्या अभिधामूलाया व्यञ्जनाया द्वौ भेदौ।

वस्तुतस्तु नानार्थशब्दस्थलेऽप्राकरणिकोऽर्थोऽभिधेयो व्यङ्ग्यो वेति विवादास्पदम्। अभिनवगुप्तपादाचार्येण विषयममुं सूक्ष्मेक्षिकया पर्यालोचयता चत्वादि मतानि समुपस्थापितानि स्वकीये ध्वन्यालोकलोचने। तेनेदमुन्नीयते यदानन्दवर्धनाचार्यादारभ्याभिरनवगुप्तपादाचार्यपर्यन्तं ध्वनिवादिनां गोष्ठीषु अभिधामूलायां व्यञ्जनायां शब्दस्य व्यञ्जकतामुद्दिश्य गहनातिगहनो विचारः प्रावर्तत। तेषामेवाचार्याणां मतसरणिरभिनवगुप्तपादाचार्येण चत्वारि मतान्युपस्थापयता प्रदर्शिता।

---

[1] तत्रैव, पृ 241।

[2] शास्त्री, पण्डितपट्टाभिराम., आनन्दवर्धन-ध्वन्यालोक, ध्वन्यालोकलोचनटीका, पृ 241।

**वस्तुरूप्यर्थोऽभिधेयो व्यङ्ग्यो वेत्यत्र अभिनवगुप्तप्रोक्तं प्रथमं मतम्**

**"अत्र केचन मन्यन्ते। यत एतेषां शब्दानां पूर्वमर्थान्तरेऽभिधान्तरं दृष्टम्, ततस्तथाविधे अर्थान्तरे दृष्टतदभिधाशक्तेरेव प्रतिपत्तुर्नियन्त्रिताभिधाशक्तिकेभ्य एतेभ्यः प्रतिपत्तिर्ध्वननव्यापारादेवेति शब्दशक्तिमूलत्वं व्यङ्ग्यत्वं चेत्यविरुद्धम्''।**[1]

अयमाशयः। नानार्थवतश्शब्दस्य येषु येष्वर्थेषु संकेतो नियतो भवति, ते ते अर्था अवगतसङ्केतेन प्रतिपत्त्रा ज्ञायन्ते। तद्यथा- हरिरिति शब्दो वानरसूर्याद्यर्थेषु नियतः। अतस्तत्तच्छब्दस्य तेषु तेषु सर्वेष्वर्थेषु येन केनचित् पूर्वं यथासमयो ज्ञातः, तस्य तादृश्येव प्रतिपत्तिर्भवति। परं येनैतेषां शब्दानां पूर्वं सर्वेषु विविधेषु अर्थेषु समयो न ज्ञातः, तस्य नानार्थज्ञानं तस्य शब्दस्य न भवति। यथाहि- हरिरिति शब्दस्य येन केनचित् वानरूपेर्थे एव संकेतः पूर्वं गृहीतः, तस्यैकार्थविषयिण्येव प्रतिपत्तिः। परं येन हरिरिति शब्दस्यापरेष्वर्थेष्वपि संकेतो गृहीतः, तस्य तच्छब्दस्यापरार्थविषयिण्यपि प्रतिपत्तिः। अतो नानार्थकस्य हरिरित्यादिकस्य पदस्य सर्वेऽर्थास्तेषामेव बोधविषया भवन्ति, यैस्तस्य तस्य शब्दस्य समयः पूर्वं तेषु तेष्वर्थेषु गृहीतः। परं यदाऽनेकार्थकस्य पदस्य नानार्थप्रतिपत्तिर्नियामकेन संयोगादिना श्रृंखलीक्रियते तदाप्रस्तुतस्यापरार्थस्य बोधो ध्वननव्यापारात्। नहि नियामकेन संयोगादिना निगडीकृताभिधा अप्रस्तुतार्थबोधने प्रभवति। भवति चार्थप्रतीतिरतः केनापि व्यापारेण तत्र भाव्यम्। स च व्यापारो व्यञ्जना। अतः प्रकरणादिकेन प्रतिबन्धकेन प्रस्तुतेऽर्थेभिधायां नियन्त्रितायां सत्याम्, अप्रस्तुतस्यार्थस्य या प्रतीतिः स व्यञ्जनयैवेति प्रथममतावलम्बिनामाशयः। बतदेवोपजीव्य मम्मटभट्टस्य अभिधामूलाया शाब्दा व्यञ्जनाया लक्षणं प्रवर्तते।[2] तदनुकृत्यैव साहित्यदर्पणकारेण विश्वनाथेनापि प्रोक्तम्-

**अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।**
**एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया।।**[3]

---

[1] तत्रैव।

[2] अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
सयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम्।। -मम्मट, काव्यप्रकाश, 2, 19।

[3] विश्वनाथ., साहित्यदर्पण, 2, 14।

**वस्तुरूप्यर्थोऽभिधेयो व्यङ्ग्यो वेत्यत्र अभिनवगुप्तप्रोक्तं द्वितीयं मतम्।**

**"अन्ये तु साभिधैव द्वितीया अर्थसामर्थ्य ग्रीष्मस्य भीषणदेवताविशेषसादृश्यात्मकं सहकारित्वेन यतोऽवलम्बते, ततो ध्वननव्यापाररूपोच्यते।''[1]**

अयमाशय:। यथाभिधया प्राकरणिकोऽर्थोऽभिधीयते, तथैवाप्राकरणिकोऽपि। परमियान् खलु विशेष:। प्राकरणिकमर्थं बोधयन्ती शक्तिरभिधैव। अप्राकरणिकमर्थमपि प्रत्याययन्ती शक्ति: सैव। परं प्रथमाभिधा प्राकरणिकमर्थ बोधयन्ती संकेतग्रहणमात्रमेव सहकारित्वेनापेक्षते, अतस्तस्या अभिधात्वं निर्बाधम्। परमप्रस्तुतार्थबोधिका द्वितीयाभिधा संकेतग्रहणमात्रातिरिक्तमर्थसामर्थ्यादिकमप्यधिकं किञ्चित् सहकारितया अपेक्षते, अतो द्वितीयाभिधा सहकारिसामग्रीवशात् प्रथमात: अभिधातो भिद्यते। द्वितीयाभिधा प्रथमातोऽभिधातो भिन्नं सहकारिकारणमपेक्षते, अतो द्वितीयाभिधैवोपचारतो व्यञ्जनोच्यते। तद्यथा-

**अत्रान्तरे कुसुमसमययुगमुपसंहरन्नजृम्भत ग्रीष्माभिधान: फुल्लमल्लिकाधवलाट्टहास: महाकाल:।[2]**

इत्यत्र महाकालादयश्शब्दा रूढिर्योगाद्बलीयसीति न्यायमपाकुर्वन्त: शक्त्या ग्रीष्मर्तुरूपिणमर्थमभिदधति। ततश्च भीषणदेवतादिकस्यातिरिक्तस्यार्थस्यापि प्रतीतिरेभिरेव शब्दैर्भवति। परं भीषणदेवतादिकमर्थमभिदधती द्वितीयाभिधा महाकालग्रीष्मर्तुरूपिणमुपमानोपमेयभावं सहकारित्वेनापेक्ष्य प्रवर्तते, अतस्तस्या उपचारेण नामान्तरम्। भीषणदेवरूपार्थबलेन सादृश्यमत्र ध्वन्यते। द्वितीयाभिधा सहकारिणार्थान्तरेणोपोद्वलिता उपमादीनामलंकाराणां व्यंग्यत्वे निबन्धनत्वमुपयातिं अत एवान्यधर्मस्य संक्रमणात् भक्त्या द्वितीयाया अभिधाया ध्वनिरिति नामकरणमुपपन्नम्। अतिरिक्तनिमित्तमपेक्षमाणा द्वितीयेयमभिधा न शब्दस्य स्वाभाविकी वृत्ति: प्रथमाभिधावत्, अपित्वौपचारिकी वृत्तिर्व्यञ्जनावत्। तथा सति द्वितीयाभिधैव व्यञ्जनेत्यभिधीयते उपाधिवशात्।

---

[1] शास्त्री, पण्डितपट्टाभिराम., आनन्दवर्धन-ध्वन्यालोक, ध्वन्यालोकलोचनटीका, पृ 242।

[2] शास्त्री, पण्डितपट्टाभिराम, आनन्दवर्धन-ध्वन्यालोक, ध्वन्यालोकलोचनटीका, पृ 241।

परं नैषः पक्षो युक्तियुक्तः। योपमा अप्राकरणिकार्थप्रतीत्यनन्तरं स्वात्मलाभं लभते, सैव कथमप्राकरणिकार्थप्रतीतौ सहकारित्वमुपयातुं प्रभवति। यद्युपमानोपमेयभावप्रतीतिः प्रथमं भवेत्तदा द्वितीयामभिधां प्रत्यसौ निमित्ततामुपेयात्। यतो निमित्ततैव न सम्भाव्यते, अतो द्वितीयाभिधाप्रसरणं सर्वथाऽसम्भवम्। एवमन्योऽन्याश्रयदोषदुष्टमिदं मतं सर्वथाऽग्राह्यम्

**वस्तुरूप्यर्थोऽभिधेयो व्यङ्ग्यो वेत्यत्राभिनवगुप्तप्रोक्तं तृतीयं मतम्**

**एके तु शब्दश्लेषे तावद्भेदे सति शब्दस्य; अर्थश्लेषेऽपि शक्तिभेदाच्छब्दभेद इति दर्शन द्वितीयः शब्दस्त्रानीयते। स च कदाचिदधाव्यापारात् यथोभेरूत्तरदानाय श्वेतो धावतीति प्रश्नोत्तरादौ वा तत्र वाच्यालङ्कारता। यत्र तु ध्वननव्यापारादेव शब्द आनीतः, तत्र शब्दान्तरबलादपि तदर्थान्तंर प्रतिपन्न प्रतीयमानमेव युक्तम्।**[1]

अयमाशयः। यत्र श्लेषादौ द्वायर्थकात् पदादर्थद्वयप्रतिपत्तिः प्राकरणिकी तत्राभिधैव व्यापार उभयार्थविषये। तथाहि- को धावति, किंरूपश्चेति प्रश्नद्वयोत्तरे केचचिदुच्यते श्वेतो धावतीति। अत्र 'श्वेतः' इति पदं भङ्क्त्वा श्वा इतो धावतीति को धावतीत्यस्य प्रथमप्रश्नस्योत्तरम्। किंरूपश्चेति द्वितीयप्रश्नस्य श्वेतो धावतीत्युत्तरम्। अत्रोभयोः प्राकरणिकयोरर्थयोरभिधयैव प्रतीतिः श्लिष्टपदमर्यादया, पूर्वत्र पदं त्रोटयित्वा, अपरत्र च यथाश्रुतग्रहणेन। परमुभयोरर्थयोः प्रतीतिः प्राकरणिकत्वादभिधयैव। यतः सभङ्गश्लेषे शब्दस्य भञ्जनेनासमानशब्दाभ्यामर्थद्वयावगतिरभिधया। यथा सर्वदो माधवः इत्यत्र सर्व ददातीति सर्वदो माधवः श्रीकृष्ण इत्यर्थबोधकौ शब्दौ विद्येते। अतः पदभञ्जनं विनैव तत्तच्छब्दाभ्यां तत्तदर्थप्रतीतिरभिधया। 'सर्वदो माधवः' इत्यस्यार्थस्यापि प्रतीतिः। अयमर्थः 'सर्वदा-उमाधवः' इत्येवं पदत्रोटनेनायाति। परं शिवरूपार्थबोधकः उमाधवः इति शब्दः श्रीकृष्णरूपार्थबोधकात् माधवशब्दाद्भिन्नः एव। सभङ्श्लेषे उभयार्थप्रतीतिर्नैकस्माच्छब्दात्, परं भिन्नाभ्याम्। तथा सत्यभिधैवार्थद्वयप्रत्यायने समर्थेति स्पष्टम्। यत्र चार्थश्लेषस्तत्राप्यपरार्थप्रतीत्यर्थ द्वितीयः शब्द आनीयते, तत्राप्यपरार्थप्रतीतिः

[1] तत्रैव।

परिकल्पिताच्छब्दादभिधयैव। तद्यथा- पयोधरः, इत्यत्र स्तनमेघरूपिणारर्थयोः प्रतीतिः शब्दमभङ्क्त्वैव भवति। यदि स्तनरूपोर्थः प्रमिमपयोधरशब्देनाभिधीयते, तर्हि मेघरूपापरार्थबोधार्थम् अपरः पयोधरशब्दस्त्र परिकल्प्यते। तेन स्तनरूपार्थप्रतीतिः प्रथमात् पयोधरशबदात्, मेघरूपार्थप्रतीतिश्च द्वितीयात् परिकल्पितात् पयोधरशब्दात्। एवमर्थश्लेषेऽपि अपरशब्दपरिकल्पनया शक्त्यैवापरार्थप्रतीतिः। इत्थं शब्दश्लेषो वा उभयत्र शब्दद्वयसद्भावे योभयार्थप्रतीतिरसावभिधयैव। तत्र चोभयार्थयोः प्राकरणिकत्वे श्लेषादिवाच्यालंकारता अशक्यशंका। परं यत्र द्व्यर्थकात् पदात् ज्ञायमानोऽपरोऽर्थोऽप्राकरणिकः, तत्र परिकल्प्यमानोऽप्यपरश्शब्दो नाभिधयो अप्राकरणिकमर्थमभिधाति, परन्तु व्यञ्जनयापरार्थ ध्वनयति। अयमपरोऽर्थः अप्राकरणिकः सन् प्रतीयमानः। अतोऽनभिधेयत्वात्तस्यार्थस्य ध्वननमेव युक्तियुक्तम्। एवं परिकल्पितादपि शब्दादवसीयमानोऽप्राकरणिकोर्थः शब्दश्लेषार्थश्लेषवद्वा नाभिधया बोध्यः। परमप्राकरणिकत्वात् प्रतीयमानः सन् स्वात्मलाभार्थ शक्तिभिन्नं व्यञ्जनमेव व्यापारानन्तरं नितान्तमपेक्षते। यद्ययमर्थोऽप्राकरणिकः प्रतीयमानः तर्हि तत्प्रत्ययानपरस्य शब्दस्यापि व्यञ्जनाव्यापारमुखप्रेक्षित्वं दैवसिद्धम्।

इदमपि मतं नोपपत्तिपूर्वकमुपन्यस्तं दृश्यते। यद्यप्राकरणिकोर्थः प्रतीयमानः स्यात्तदैव तद्द्योतनार्थं प्रवृत्तो व्यापारोऽभिधाभिन्नो भवेत्। परमप्राकरणिकोऽप्यर्थः शब्दानां तत्र सङ्केतादभिधेय एव पर्यवस्यति। यदि संयोगादिना प्रतिबन्धकेन अभिधानियन्त्रणादप्राकरणिकार्थस्यानभिधेयत्वं प्रोच्यते तेन च तस्यार्थस्य प्रतीयमानतायां ध्वननमङ्गीक्रियते, तर्हि तार्तीयीकस्यास्य मतस्य प्रथममतान्न कश्चिद्भेदः। केवलं भङ्ग्यन्तरेणास्योत्थापनं क्रियते। अतोऽस्मिन् मते न कश्चिद्विशेषः।

### वस्तुरूप्यर्थोऽभिधेयो व्यङ्ग्यो वेत्यत्राभिनवगुप्तप्रोक्तं चतुर्थ मतम्

**इतरे तु द्वितीयपक्षव्याख्याने यदर्थसामर्थ्य तेन द्वितीयाभिधैव प्रतिप्रसूयते ततश्च द्वितीयोऽर्थोऽभिधीयते एव न ध्वन्यते, तदनन्तरं तु तस्य द्वितीयार्थस्य प्रतिपन्नस्य प्रथमार्थेन प्राकरणिकेन साकं या रूपणा सा तावद्भात्येव, न**

**चान्यत: शब्दादिति सा ध्वननव्यापारात्। तत्राभिधाशक्ते: कस्याश्चिदप्यनाशङ्कनीयत्वात्।**[1]

अत्र चतुर्थपक्षावलम्बिन: पूर्वपक्षं व्यपाकृत्य स्वमतमेवं सिद्धान्तयन्ति। प्राकरणिकाप्राकरणिकयोरर्थयो: शक्तिवेद्यता अनपलपनीया, तत्तच्छब्दानां तत्तदर्थेषु पूर्वं संकेतात्। अतो येषु अर्थेषु शब्दस्य संकेत: पूर्वं नियतस्तांस्तानर्थानसौ शक्त्या बोधयत्येव। परमेवंविधेषु स्थलेषु शक्तिबोध्यानां प्राकरणिकाप्राकरणिकार्थानां परस्परं यदि न कोऽपि सम्बन्धस्तदाऽसम्बद्धार्थदोषकथनप्रसंगस्तत्र समापतेत्। अत: प्राकरणिकाप्राकरणिकयोरर्थयो: सम्बन्ध: कश्चिदवश्यं कल्प्यते। असौ सम्बन्धो न कदाचिदभिधया बोध्यस्तत्र शब्दानां संकेताकरणात्। तद्यथा-

अत्रान्तरे कुसुमसमययुगमित्यादौ पूर्वोक्ते गद्यभागे यद्यपि महाकालशब्दस्य ग्रीष्मर्तुभीषणदेवतारूपिणावर्थौ अभिधाबोध्यो स्तस्तथापि तयो: परस्परमुपमानोपमेयभावेनावस्थानरूपो य: सम्बन्धस्तत्र महाकालादीनां पदानां न शक्ति:। असौ सम्बन्ध: रूपणात्मक: प्रतीयमानत्वाद् व्यञ्जनाद्योत्य एव। नहि प्राकरणिकाप्राकरणिकयो: ग्रीष्मर्तुमहाकालरूपिणोरर्थयो: प्रत्यायने प्रभवन्ती शक्तिरभिधा शब्देन स्पष्टमनावेदितं गूढमुपमानोपमेयभावात्मकम् उपमोत्प्रेक्षाद्यलंकाराणां जनकमर्थं द्योतयितुं स्वप्नेऽपि प्रभवति। अत: आम्रान् पृष्ट: कोविदारानाचष्ट इत्याभाणकवचनवत् प्राकरणिकाप्राकरणिकयोरुभयोरभिधाभिहितयोरर्थयोरसम्बद्धार्थता मा प्रसज्येतेति कृत्वा सर्वदाऽनभिधेया रूपणा व्यञ्जनासमुपस्थाप्यैव। रूपणा चासावलंकाराणां प्रसवित्री केवलं परिवृत्तिमसहमानाच्छब्दादेव सम्भाव्यते, नान्येन प्रकारेणेति नानार्थकप्रतीतिस्थले शब्दशक्तिमूलध्वन्यभ्युपगम: सर्वथाऽऽवश्यक:। इदमेव मतमानन्दवर्धनाचार्यसम्मतम्, पश्चाच्चाप्यदीक्षितेन वृत्तिवार्तिके समुपोद्बलितम्।

## (इ) तत्र महिमभट्टाचार्यमतम्

महिमभट्टाचार्येण शब्दशक्तिमूलो ध्वनि: सर्वथा निराक्रियते। तन्मते शब्दस्याभिधातिरिक्तव्यापाराभावात्।[2] अत्रान्तरे कुसुमसमययुगमुपसंहरन्नित्यादौ

---

[1] शास्त्री, पण्डितपट्टाभिराम., आनन्दवर्धन-ध्वन्यालोक, ध्वन्यालोकलोचनटीका, पृ 242।

[2] इत्यत्रापाकरणिकमहाकालाख्यदेवताविशेषविषया प्रतीतिरसाध्या तस्याश्चाट्टहाससम्बन्धो युगसहारव्यापारश्चेत्युभय साधन तस्य तत्कार्यत्वात कार्यकारणभावश्चापयोरागम प्रमाणमुल इति। महिमभट्ट, व्यक्तिविवेक, 1, 104-105।

आनन्दवर्धनाचार्येण यः शब्दशक्तिमूलोलंकारध्वनिः। प्रोक्तः, असौ महिमभट्टमते साध्यसाधनभावमूलानुमितिपर्यवसायी। तद्यथा- पूर्वोक्ते स्थले अप्राकरणिको भीषणदेवतारूपोर्थोऽत्र साध्यः, तत्प्रतीतिश्चाट्टहासयुगसंहाररूपाभ्यां साधनाभ्याम्। यथा साधनेन धूमेन साध्यो वह्निरनुमीयते, तथैवाट्टहासयुगसंहाररूपाभ्यां हेतुभ्यां तत्सम्बद्धो भीषणदेवताविशेषरूपोर्थोऽनुमितो भवति। अट्टहासयुगसंहारयोर्महाकालेन सह सम्बन्ध आगमप्रमाणसिद्धः। एवं नियताद्धेतोर्नियतस्य सम्बिन्धनोऽग्न्यादेः प्रतीतिर्यथानुमानम्, तथैवाट्टहासादीनां महाकालाख्यदेवेन सहागमप्रमाणसिद्धसाहचर्येणावस्थानाल्लिङ्गलिंगिभावमूलानुमितिर्न खलु ध्वनिः।[1]

यत्र च साध्यसाधनभावो नोह्यस्त्रताप्राकरणिकस्यार्थस्य प्रतीतिरेव निराक्रियते महिमभट्टेन। तद्यथा-

**दत्तानन्दाः प्रजानां समुचितसमयक्लिष्टसृष्टैः पयोभिः**
**पूर्वाह्णे विप्रकीर्णा दिशि विरमत्यन्हि संहारभाजः।**
**दीप्तांशोर्दीर्घदुःखप्रभवभवभयोदन्वदुत्तारनावः**
**गावो वः पावनानां परममपरिमितां प्रीतिमुत्पादयन्तु।।**[2]

इत्यत्राप्राकरणिकस्य सुरभिरूपिणोऽर्थान्तरस्यात्पत्तौ कार्यकारणभावस्य निबन्धनस्य आदर्शनादप्राकरणिकार्थप्रतीतिर्न समुदेति महिमभट्टमते।[3]

महिमभट्टमते सामग्रीवशादेव शब्दो नानार्थबोधको भवति, न तु तन्निरपेक्षः। अतो यत्राप्राकरणिकार्थबोधिकायाः सामग्र्या अवस्थानं तत्राश्लिष्टेभ्योऽपि पदेभ्यो न विविधार्थप्रत्ययः। यथा समासोक्तौ-

**उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।**

---

[1] शास्त्री, मधुसूदन, महिमभट्ट-व्यक्तिविवेक, पृ 417।

[2] य शब्दशकितमूलोऽन्य प्रभेदो वर्णितो घ्वने ।
सोडयुक्तोऽन्यत एवासौ तत्रे ष्टार्थान्तरे गति ।
शब्दशक्त्यन्तरा भावस्यासकृत् प्रतिपादनात् ।।
शास्त्री, पण्डितपट्टाभिराम, आनन्दवर्धन-ध्वन्यालोक, पृ 244।

[3] एवञ्चास्य वाच्यव्यतिरेकिणोऽर्थान्तरस्य प्रतीतिरेव न समस्तीति, यत्राप्रस्तुताभिधानप्रसङ्गभयात्तयोरुपमानोपमेयभावपरिकल्पन तदपि निर्मूलमेवेत्यवगन्तव्यम्।

**यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद् गलितं न लक्षितम्।।**[1]

शशिना इति पदमश्लिष्टमेव नायकरूपिणमप्रस्तुतमर्थ बोधयति। उपोढरागेणेति सामग्रीवशात्। गावो वः पावनानामित्यादौ नानार्थकान्यपि पदानि सादृश्यसूचकेवादिपदाभावे अप्राकरणिकं सुरभिरूपिणमर्थं नैवावगमयन्ति। तथा सति गावो वः पावनानामित्यादौ विशेषणविशेष्यपदयोरनेकार्थकत्वेऽपि सुरभिरूपार्थप्रत्यायकमिवादिपदं किमपि निबन्धनं वक्तव्यमेव। तद्विना नापरार्थप्रतीतिः।

एवं पूर्वोक्ते उदाहरणे आनन्दवर्धनाचार्येण यत् सूर्यकिरणसुरभिरूपिणोरर्थयोरुपमानोपमेयभावेनावस्थानात् रूपलंकारस्य प्रतीयमानताामलंकारध्वनिः समाख्यायि, तत् महिमभअ्टेनोपमानाना सुरभ्यादीनामुपमेयेन सूर्यकिरणरूपेणार्थेन सह सम्बन्धाभिधायिनो वाचकस्येवादिपदस्यानुपादानादवश्यंवाच्यावचनाद्दोषायैवेति वदता दूरमपास्तम्।[2]

मम धिया नतन्मतं युक्तियुक्तम्। शाब्द्यामभिधामूलायां व्यञ्जनायां सहृदयहृदयसमास्वाद्यौ वस्त्वलङ्काररूपावर्थौ वाच्याया इवादिसामग्र्या अभावे नैवानुभूयेते इति यन्महिम्ना रसिकजनानुभवमपलपमानेन प्रोद्घुष्यते, तत्तस्य आहोपुरुषिकामेवोद्घाटयति, अर्थप्रतीतिर्न भवतीत्यत्र विनिगमनाभावात्। दत्तानन्दाः प्रजानामित्यादाविवादिसामग्र्युपादानेऽर्थस्य व्यङ्ग्यत्वमेव त्रुट्येत् तस्यार्थस्येवादिपदोपादानेन वाच्यत्वात्। अत इवादिसामग्र्यनुपादाने सुरभिरूपिणोऽर्थस्य गूढत्वाद्गुणोऽधिको न खलु दोषः। व्यङ्ग्यत्वेनैवार्थश्चारुत्वमातनोति न तु वाच्यत्वेनेति सहृदयानुभवप्रामाण्यात्।

### (ई) मम्मटाचार्यमतम्

मम्मटभट्टोऽभिनवगुप्तपदाङ्कानुगः। स शाब्द्या अभिधामूलाया व्यञ्जनाया लक्षणमित्थमुपनिबन्धाति स्वकीये काव्यवप्रकाशे-

**अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।**

---

[1] शास्त्री, पण्डितपट्टाभिराम, आनन्दवर्धन-ध्वन्यालोक, पृ 109।

[2] अत्र हि गाव इत्येतस्य विशष्यवाचि तु उपमानाभिमतार्थान्तरवृतित्वेऽपि विशष्णाना चोभयार्थानुगुण्येऽप्युपमानस्य तत्सम्बन्धाभिधायिनश्चावश्यवाच्यावचन यत्त स दोष इत्येतद्वितनिष्यते। तत्रैव पृ 366।

**संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम्।।**[1]

एतेन संयोगादिभिः प्रतिबन्धकैर्नानार्थकस्य शब्दस्याभिधायामेस्मिन्नर्थे नियन्त्रितायां सत्याम्, तस्मादेव परिवृत्यसहाच्छब्दात् यार्थान्तरप्रतीतिरसौ व्यञ्जनयैवेत्यर्थेन अप्राकरणिकस्यार्थस्य व्यङ्ग्यत्वं सिद्धं मम्मटभट्टमतेन। इत्थमसावपि वस्तुरूपिणोऽप्राकरणिकार्थस्य ध्वननं स्वीकुर्वन् शाब्द्या व्यञ्जनाया वस्त्वलङ्काराभ्यां द्वौ भेदौ व्यवस्थापयति।[2]

## (उ) हेमचन्द्राचार्यमतम्

**नानार्थकस्य मुख्यस्य शब्दस्य संयोगादिभिरमुख्यस्य च मुख्यार्थबाधादिभिर्नियमिते व्यापारे वस्त्वलंकारयोर्वस्तुनश्च व्यञ्जकत्वे शब्दशक्तिमूलः पदवाक्ययोः**[3] इत्येवं हेमचन्द्राचार्येण काव्यानुशासने शाब्दीं व्यञ्जना लक्षिता। अस्मिल्लक्षणोपि शाब्द्या अभिधामूलाया व्यञ्जनाया हेमचन्द्रेण तदेव स्वरूपं निर्दिष्टं यन्मम्मटभट्टादिभिः पूर्वं प्रोक्तम्। केवलं पदवाक्यगतत्वेनाभिधामूलाया व्यञ्जनाया हेमचन्द्राचार्येण पुनर्विभागः कृतः। तन्मते वस्त्वलङ्कारव्यङ्ग्याभ्यां द्विधा विभक्ता शाब्द्यभिधामूला व्यञ्जना वस्त्वलकाररूपिणो व्यंग्यार्थस्य पदवाक्यवशत्वात् पुनर्भिद्यते।

## (ऊ) विश्वनाथाचार्यमतम्

साहित्यदर्पणे विश्वनाथाचार्यस्य शाब्द्या अभिधामूलाया व्यञ्जनाया निरूपणं मम्मटभट्टमतानुरोधि। न तत्र किञ्चिन्नवीनं तत्वं समुपलभ्यते। केवलं मम्मटेन शाब्द्यभिधामूला व्यञ्जनेति नाम्ना स्पष्टं तल्लक्षणं न प्रतिपादितम्, संयोगाद्यैरवाच्यर्थधीकृद्व्यापृतिरञ्जनमित्येवमेव लक्षणं कृतम्। परं विश्वनाथाचार्येण निर्मलं स्पष्टञ्च लक्षणं दत्तम्। तद्यथा-

**अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।**

---

[1] मम्मट, काव्यप्रकाश, 2, 19।

[2] अलङ्कारोऽथ वस्त्वेव शब्दाद्यत्रावभासते।
प्रधानत्वेन स ज्ञेयश्शब्दशक्त्युद्भवो।। -मम्मट, काव्यप्रकाश, 4, 38।

[3] पण्डितशिवदत्त, हेमचन्द्र - काव्यानुशासनम्, पृ 37।

**एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया।।**[1]

एवं विश्वनाथाचार्यमतेऽप्यप्राकरणिकार्थप्रतीतिर्व्यञ्जनयैव भवति, अभिधाया प्राकरणिकेऽर्थे निरोधात्। अनन्तरं विश्वनाथेनापि शाब्द्या अभिधामूलाया व्यञ्जनाया वस्त्वलंकारयोर्व्यंग्यत्वे सति द्वैविध्यं प्रतिपादितम्।[2]

### (ए) अप्पयदीक्षिताचार्यमतम्

अप्पयदीक्षिताचार्यो नानार्थशब्दस्थले अप्राकरणिकार्थस्याभिधेयत्वं प्रतिपादयंस्तस्य व्यङ्ग्यस्त्वं विरुणाद्धि। तन्मते नानार्थकस्य शब्दस्य प्राकरणिकाप्राकरणिकोभयविधार्थयो: शक्तेरप्रस्तुतोऽप्यर्थ: शब्दस्य वाच्य एव। नहि संयोगादयो नियामका अनेकत्र गृहीतशक्तीनां पदानां शक्तिं नानार्थेषु प्रसरणान्निवारयन्ति। यत्र शब्दस्य संकेतो गृहीतस्तत्र शब्दस्य शक्तेरभिधेयत्वमेव तत्तदर्थस्य। नह्येतद् वक्तुं युक्तं यत्प्राकरणिकोऽर्थोऽप्राकरणिकार्थप्रतीतिं निरुणद्धि, अप्राकरणिकार्थेनापि प्राकरणिकार्थनिरोधसम्भवात्। प्राकरणिकोर्थ एव प्रथमं स्फुरेन्नाप्राकरणिकोर्थ इति विनिगमनाभावात्। तद्यथा-

**असाबुदयमारूढ: कान्तिमानू रक्तमण्डल:।**
**राजा हरति लोकस्य हृदयं मृदुभि: करै:।।**[3]

अत्र चन्द्रोदयवर्णनप्रसंगे योऽप्राकरणिको भूपत्यभ्युदयविशिष्टोऽर्थ: प्रतीयते असावभिधेय एव नानार्थकानां करादिपदानां शक्तेरुभयत्र प्रसरणात्। प्राकरणिकाप्राकरणिकयोरर्थयो: करादिपदैरनिरुद्धप्रतीतेश्च।[4]

किञ्च जलार्थिभिर्जलाशयाज्जलं क्षेत्रेष्वानेतुं कुल्या विरच्यन्ते। जलाशयान्निर्गच्छज्जलं सर्वासु कुल्यासु समानभावेन प्रवहति। कुल्यासु कृतासु जलाशयात्

---

[1] विश्वनाथ:, साहित्यदर्पण, 2, 14।

[2] वस्त्वलङकाररुपत्वाच्छ्ब्दशक्त्युद्भवो द्विधा।। विश्वनाथ, साहित्यदर्पण, 4, 7।

[3] शर्मा, पण्डितशिवदत्त, अप्पयदीक्षित- वृत्तिवार्त्तिकम्, पृ 9।

[4] व्य तु ब्रूम. 'असावुदयमारुढ' इत्यादौ प्राकरणिकेऽर्थे प्राकरणिकवदप्राकरणिकेऽपि राबकरमण्डलादिशब्दाना परस्परान्वययोग्यनृपतितद्ग्राहयधनदेशादिवाचकाना समभिव्याहाररुपमभिधानियामकमस्तीत्यर्थद्वयस्यापि प्राकरणिकत्व इव प्राकरणिकाप्राकरणिकरुपत्वेऽप्युभयत्राभिधैव व्यापार । शर्मा, पण्डितशिवदत्त, अप्पयदीक्षित- वृत्तिवार्त्तिकम्, पृ. 10।

प्रवहतो जलस्याभिमतकुल्यायामेव प्रसरणमनभिमतकुल्यायाञ्चासञ्चरणमिति न नियमेन वक्तुं शक्यम्। यथा प्रवहतो जलस्य सर्वास्वभिमतानभिमतकुल्यासु समान भावेन प्रसरणमुपपन्नम्, तथैव नानार्थकस्यापि पदस्यानेकत्र शक्तिग्रहे सति प्रकृताप्रकृतार्थेषु समान एव संकेत:। एवमनेकेष्वर्थेषु शब्दस्य शक्ते: कुल्याजलवत् प्रसरणात् प्राकरणिकवदप्राकरणिकोऽप्यर्थोऽभिधाबोध्योऽवगन्तव्य: तत्कृते व्यञ्जनाश्रयणं निर्निबन्धनम्।[1]

एवं यद्यप्यप्राकरणिकस्यार्थस्य नानार्थकशब्दस्थले व्यञ्जनागम्यत्वं विप्रतिपद्यतेप्पयदीक्षिताचार्येण, परं तथापि नानार्थकशब्दस्थलेऽलङ्काराणां व्यङ्ग्यत्वं नापह्नोतुं शक्यम्। अलंकाररूपोर्थस्तु न शब्दस्य सङ्केतितोर्थो येनाभिधा तत्र सञ्चरेत्, असावर्थस्तु स्वशब्देनानुक्तो व्यङ्ग्य एवेति पुरा प्रोक्तमेव। अत एवालङ्काराणां ध्वननमङ्गीकुर्वता अप्पयदीक्षितेन आनन्दवर्धनाचार्यमतं समुपोद्बलितम्।[2]

### (ऐ) पण्डितराजजगन्नाथमतम्

पण्डितराजजगन्नाथेनापि विवाग्रस्तोऽयं विषयो भृंशं विचारितो रसगङ्गाधरे। तेन सूक्ष्मेक्षिकया अभिधामूला शब्दस्य व्यञ्जकता तर्कनिकषोपले सुपरीक्षिता। तत्रादौ तेन नानार्थशब्दस्थले व्यञ्जनामङ्गीकुर्वतां ध्वनिकारानुयायिनामाचार्याणां विचारसरणि: प्रथममतद्वितीयमतरूपेण द्विधोपस्थापिता। अनन्तरञ्च मतद्वयमिदं विदूष्य स्वधिया शाब्द्या व्यञ्जनाया यौक्तिकं विवेचनं कृतम्।

**जगन्नाथेन पूर्वपक्षरूपेणोपस्थापितं ध्वनिवादिनां मतम्**

नानार्थकशब्दश्रवणानन्तरं तस्य तस्य तेषु तेष्वर्थेषु संकेतग्रहतुल्यत्वात् सर्वेषां तत्तन्नानार्थवतां शब्दानां सङ्केतिता अर्था बुद्धिसमारूढा भवन्ति। ततो वाक्ये नानार्थवतश्शब्दस्य कतमोऽर्थ उपादेय:, कोऽर्थश्च वक्तुस्तात्पर्यविषयीभूत इति श्रोतुर्मनसि सन्देह उत्पद्यते। प्रकरणादिकं पर्यालोचयञ्छोता नानार्थवतश्शब्दस्य प्रकरणानुकूलमर्थं शक्त्याऽवगच्छति। प्रकरणादिकं नियाकमप्राकरणिकं सर्वमर्थं प्रतिबध्नाति। प्राकरणिकोऽर्थ: शक्त्याऽभिधीयते। परमप्राकरणिकोर्थ: प्रतीतिपथमवतरन् शक्त्या नाभिधीयते। प्राकरणिकमर्थं प्रत्याय्य तस्या उपक्षयात्। अत: अप्राकरणिकार्थप्रत्यायनार्थं शक्तिभिन्नोन्य:

[1] तत्रैव, पृ 11।

[2] यतु प्राचामप्रस्तुते शक्तिमूलव्यव्यनवृत्यभिधन तदप्रस्तुतार्थप्रतीतिमूलके यथा 'उदयमारुढ' इत्यादिविशेषणविशिष्ट पृथिवीपति स्वल्पैर्ग्राह्यधनैलोकस्य हृदय रञ्जयति एव तथाभूतश्चन्द्रमा मृदुलै किरणै इत्यादिरुपेण प्रतीयमाने उपमाधर्थालङ्कारे तदवश्यभावध्धीकरणाभिप्रायेण। तत्रैव, पृ 15।

कश्चिच्छब्दव्यापारोऽवश्यमभ्युपगन्तव्यो भवति। स एव व्यापारोप्राकरणिकार्थसमुल्लासको व्यञ्जनपदव्यपदिष्ट:। अस्मिन्मते भर्तृहरिकारिकायामुपात्तस्य 'अनवच्छेदे विशेषस्मृतिहेतव:' इत्यस्य ग्रन्थस्य अनवच्छेदे- तात्पर्यसन्देहेसति, विशेषस्मृतिरेकार्थमात्रविषया स्मृतिरित्येवं शय्या योज्या। ननु प्रकरणादिषु प्रतिबन्धकेषु जागरूकेषु सत्सु कथं व्यञ्जनयाऽप्यप्राकरणिकार्थबोध:, अभिधावत्तस्या अपि नियमनादिति चेन्न, तस्या अप्राकरणिकार्थमेव द्योतयितुं समुल्लासात्। प्रकरणादिकै: प्रतिबन्धकै: शक्त्यां नियन्त्रितायां सत्यामप्राकरणिकार्थप्रतीतिर्व्यञ्जनयेति प्रथममतावलम्बिनां मम्मटभट्टादीनामाशय:।[1]

### जगन्नाथेन पूर्वपक्षरूपेणोपस्थापितं प्रथममतखण्डनपुरस्सरं ध्वनिवादिनां द्वितीयं मतम्

अपरे प्रकारान्तरेण अप्राकरणिकस्यार्थस्य व्यञ्जनावेद्यत्वं सिद्धान्तयन्ति। तथाहि- प्रथममते प्रकरणादिकस्य प्रतिबन्धकत्वेन स्वीकार: तद्वशाच्चाप्राकरणिकार्थप्रतीतिस्थगनमिति वार्ता न हृदयङ्गमा। प्रकरणादिको नियामकोऽप्राकरणिकार्थप्रतिपत्तिं निरोद्धुं न प्रभवति, शब्दस्य तत्तदर्थेषु संकेतकरणात्। अत एव भर्तृहरिकारिकायां स्मृतिपदस्यैकार्थमात्रगोचरत्वमिति व्याख्यानमपि न मनोरमम्। अयमाशयोऽत्रानुसन्धेय:। नानार्थकानां पदानां सर्व एव संकेतिता अर्था: समयज्ञानवत: प्रतिपत्तुरनुभवविषयत्वमुपयान्ति। परं प्रकरणादिपर्यालोचनया वक्तुर्यस्मिन्नर्थे तात्पर्यम्, स एवार्थ: श्रोत्रा गृह्यते। तेन च योऽर्थो वक्तुस्तात्पर्यभूतस्तस्यैवार्थस्य वाक्येऽन्वायाच्छाब्दबोध:। तथा सत्यप्रस्तुतार्थस्याप्राकरणिकत्वात्तस्मिन् तात्पर्यविषयतामनुपागते न तस्य वाक्येन्वय:, एवं शब्दस्य तत्र संकेतकरणात् परिस्फुरन्नप्यसावर्थोऽप्राकरणिकोऽतात्पर्यविषयीभूतत्वाद् वाक्येन्वयमलभमान: शाब्दबोधविषयतां नोपयाति। प्रतीतिश्चास्यार्थस्य सम्पद्यते। परं नासावभिधासमुपस्थाप्या। अभिधाया विषयस्तु तात्पर्यभूतोऽर्थ एव प्राकरणिक:। अतस्तस्य अतात्पर्यविषयीभूतस्यार्थस्य शब्दाद् भवन्ती प्रतिपत्ति: शक्तिभिन्नेन केनाप्यन्येन व्यापारेणैव सम्पाद्या। असौ व्यापारो ध्वन्नपदव्यपदिष्टोऽवश्यमभ्युपेय:।[2]

---

[1] म म पण्डितदुर्गाप्रसाद, जगन्नाथपण्डितराज- रसगङ्गाधर, पृ 134-36।
[2] म म पण्डितदुर्गाप्रसाद, जगन्नाथपण्डितराज- रसगङ्गाधर, पृ 136।

ननु द्वितीयस्मिन्मते विशेषस्मृतिहेतवः इत्यादेर्भर्तृहरिग्रन्थस्य वाचकत्वे नियन्त्रिते इत्यादेर्मम्मटभट्टोक्तेश्च सङ्गतिस्त्रुट्यतीति कृत्वा नाङ्गीकरणीयं द्वितीयं मतमिति चेन्न, प्रकारान्तरेणापि पूर्वोक्तग्रन्थसंगतिसम्भवात्। नहि 'विशेषस्मृति' रित्यस्य पदस्य प्राकरणिकार्थविषयिणी द्वितीया स्मृतिरित्येव व्याख्यानं सम्भवति, नापि मम्मटभट्टस्य 'वाचकत्वे नियन्त्रिते' इत्यस्य संयोगादयो नियामकाः प्राकरणिकार्थेतरानर्थान् प्रतिबध्नन्तीत्येवमेव व्याख्या समुचिता। प्रत्युत द्वितीयस्मिन्मते स्मृतिपदं निश्चयार्थपरं ग्रहीतव्यम्। अतो विशेषस्मृतिरित्यस्यत्थं व्याख्यानं द्वितीयमतावलम्बिभिः प्रस्तूयते।

नानार्थकस्य पदस्य सर्वेषु संकेतितेष्वर्थेषूपस्थितेषु, वक्तुस्तात्पर्यविषयीभूतस्यैवार्थस्य बोधो भवति। अतो विशेषस्मृतिरित्यनेन विशिष्टस्य तात्पर्यभूतस्यार्थस्य निर्णय इत्यर्थे गृहीते न काचिदसङ्गतिः। अनेकार्थकस्य पदस्य तात्पर्यविषयीभूतार्थव्यतिरिक्ताः सर्वेऽर्थाः अवाच्यार्थाः। अतस्तेषां शाब्दबोधविषयतानापत्तिः। संयोगादिभिर्वाचकताया नियन्त्रणं यत् प्रोच्यते तदपि द्वितीयमतेऽविरुद्धम्। यतो वाचकत्वे नियन्त्रिते इत्यस्यैकार्थमात्रप्रत्यायनहायकत्वमित्यर्थः, तस्यैव तात्पर्यविषयभूतत्वात्। अतो द्वितीयस्मिन्मते संयोगादयोऽप्राकरणिकार्थप्रतीतिनियामका नावगन्तव्याः, अपितु तात्पर्यविषयीभूतविशेषार्थप्रत्यायनसहायकाः। तद्वशाद् यस्मिन्नर्थे तात्पर्यम्, तस्यैव शाब्दबोधो नेतरेषामतात्पर्यविषयीभूतानामर्थानाम्।[1]

ननुव्यक्तिवादिनापि व्यञ्जकपदविरहे प्रतीयमानार्थप्रतीतिः कथमुपपाद्यते, महाकालेत्यादीनां पदानां प्राकरणिकार्थप्रत्यायनानन्तरं क्षीणशक्तित्वादिति चेन्न, अप्राकरणिकव्यङ्ग्यार्थावगमनात्पूर्वं शक्यार्थप्रतीतिसमये भासमानस्य शब्दस्यानन्तरभाविनो व्यङ्ग्यार्थस्य प्रतीतिसमयेऽपि स्मृतौ भासमानत्वात्। आहोस्विदावृत्या महाकालादिपदं तत्रानीयते, तेन च व्यङ्ग्यार्थप्रतीतिः।

अधुना पण्डितराजो जगन्नाथः स्वकीये रसगंगाधरे पूर्वोक्तं मतद्वयमधोलिखितप्रकारेण प्रत्यवतिष्ठते। यथाहि- सुरभिमांसं भवान् भुङ्क्ते इत्यस्मिन् वाक्ये वक्तरि श्यालके सति नानार्थप्रत्यायकसुरभिशब्दात् गोमांसभक्षणरूपिणोऽप्राकरणिकार्थस्य प्रतिपत्तिर्व्यञ्जनया भवतीति ध्वनिवादिनामाशयः। तत्र

[1] तत्रैव, पृ 137।

प्रकरणादिना नियन्त्रिताभिधा प्राकरणिकं सुगन्धिमांसरूपिणमर्थं प्रत्याय्य क्षीणसामर्थ्या सती नापरमप्राकरणिकं गोमांसरूपिणमर्थमवगमयितुं प्रभवतीति कृत्वा व्यक्तिवादिना व्यञ्जनाऽऽश्रीयते। परं नानार्थकस्य सुरभ्यादिपदस्य यदि नानार्थबोधने शक्तिस्तर्हि संयोगादीनां सद्भावेऽपि शब्दस्य तेषु तेष्वर्थेषु सङ्केतात् शक्त्यैव तेषामवगतिः। नहि प्रकरणादयः शब्दस्य सङ्केतितानर्थान्निरोद्धुं प्रभवन्ति। तद्यथा पयः रमणीयमित्यादौ द्व्यर्थकस्य पयः शब्दस्य दुग्धजलरूपिणोर्द्वयोरर्थयोः सङ्केतः।

यदि संयोगादीनां नियामकानां निमित्तेन नानार्थकानां पदानां प्राकरणिके एकस्मिन्नेवार्थे सङ्केत अभ्युपेयेत, तेन चापरेषामर्थानामाच्छादनं स्यात्, तर्हि प्य आनय इत्युक्ते सति पयः शब्दस्योभयार्थज्ञानवन्तः प्रकरणज्ञानशालिनश्च प्रकरणज्ञानानभिज्ञं पुरुषं कथमिदमवबोधयेयुर्यदत्र वक्तुस्तात्पर्यं जलरूपिण्येवार्थे न तु दुग्धरूपेऽर्थे। अतः संयोगादिभिः प्रतिबन्धकैरप्राकरणिकार्थप्रतीतिनियन्त्रणं भवतीति कथनं नोचितम्, शब्दस्य प्राकरणिकाऽप्राकरणिकोभयविधार्थे तुल्यसंकेतात्। किञ्च यावन्नानार्थधीजनकं पदज्ञानमस्ति, तावत् प्रतिबन्धकेषु सत्स्वपि अर्थोद्बोधकसामग्रीभूतपदज्ञानसद्भावे, संकेतितानां सर्वेषां प्राकरणिकाप्राकरणिकानामर्थानां समानैवावगतिः। 'पय आनय' इत्यादौ सत्यपि प्रकरण प्रतिबन्धके, प्रकरणज्ञानवतां द्व्यर्थप्रतीतिर्नोपरुद्धा भवति। अतो नानार्थकस्य पदस्य तेषु तेष्वर्थेषु नियतसंकेतकत्वात् योभयार्थप्रतीतिर्नासौ व्यक्तिसमुपस्थाप्या प्रत्युताभिधाबोध्यैव।[1]

प्रकरणादिज्ञानवशात् प्राकरणिकेऽर्थे तात्पर्यं निश्चीयते, ततश्च तात्पर्यविषयीभूतस्यैवार्थस्य वाक्येन्वयो भवति, अन्वितार्थस्यैव शाब्दबोध उपपद्यते। अतः अतात्पर्यविषयीभूतस्यार्थस्य प्रतीतिर्व्यक्त्येति व्यक्तिवादिनां द्वितीयमपि मतं यौक्तिक्या युद्ध्या निष्पीड्यमानं नावस्थातुं प्रगल्भते। अत्र पण्डितराज आशङ्क्ते- किमतात्पर्यविषयीभूतस्य शक्त्याऽनभिहितस्य सर्वस्यार्थस्य प्रतिपत्तिर्व्यञ्जनयेति भवतामाशयः, उत क्वाचित्क एव व्यञ्नासंचारी न सार्वत्रिक इति श्रीमतां मतम्? तत्र नाद्यः, प्राकरणिकाप्राकरणिकोभयार्थविषयिण्यां प्रतीत्यां यदि सर्वत्र व्यञ्जनोल्लासः, तर्हि नानार्थप्रतीतिस्थले यस्मिन्नार्थे वक्तुस्तात्पर्यं स एवार्थः शक्तिबोध्य इत्येतस्य नियमस्य निर्निबन्धनत्वात्। तद्यथा- भवतां मते अप्राकरणिकस्य सर्वस्यार्थस्य प्रतीतिर्व्यञ्जनासम्पाद्या। तथात्वे नानार्थकशब्दस्थले प्राकरणिकार्थबोधनियमनमहेतुकमेव।

---

[1] तत्रैव पृ 138।

यदि नानार्थस्थले व्यञ्जनोपास्यैव तर्हि प्राकरणिकस्यार्थस्य नियमनं भवेनन वा भवेत्, अप्राकरणिकार्थप्रतीतिः सर्वदा व्यञ्जनाव्यापारगम्या। तथा सति प्रकरणादिकानां प्रतिं बन्धकत्वेन परिकल्पने सर्वथाऽप्रयोजकमेवेति हृदयम्।

न द्वितीयः। व्यञ्जनायाः क्वाचित्कस्योल्लासस्य प्रामाणासिद्धरत्वात्। अत्र व्यञ्जनोल्लासोऽत्र तु नेति वक्तुमशक्यत्वात्। ननु यत्राप्राकरणिकेऽर्थे कवेस्तात्पर्यम्, तस्मिन् तात्पर्यविषयीभूतेर्थे क्वाचित्को व्यञ्जनोल्लास इति चेन्न, रूचिङ्कुरु इत्यादौ चिङ्कुरिति शब्दस्य काश्मीरीभाषायां स्त्रीयोन्यन्तर्वर्त्त्यङ्कुरविशेषेत्यसभ्यार्थस्यावगतौ कवेरतात्पर्यत्वात्। ननु यात्राप्राकरणिकार्थग्रहणविशिष्टस्य श्रोतुर्बुद्धिर्नानार्थस्थले व्यञ्जनामुल्लासयितुं समर्थेति यत्र व्यङ्ग्यार्थावगतिः क्वाचित्की न सार्वत्रिकी तत्र श्रोतुः शक्तिविशेष एव तस्याः समुल्लासे हेतुरिति चेन्न, तथात्वे श्रोतुः शक्तेर्नियन्त्रितामभिधामप्युल्लासयितुं समर्थत्वात्। नह्यत्र किमपि निबन्धनं येन श्रोतुः शक्तिविशेषः केवलं व्यञ्जनामेवोत्थापयेन्नाभिधाम्, श्रोतुः शक्तिविशेषस्योभयत्र तटस्थतया सञ्चरणात्। सम्भवत्यपि क्वाचित्के व्यञ्जनोल्लासे, अप्राकरणिकस्यार्थस्य प्रतीतिर्व्यक्तिसमुपस्थाप्या नाभ्युपगन्तव्या। यतः उल्लास्य कालकरवालमिवाम्बुवाहम् इत्यादौ नानार्थकशब्दस्थले येन नानार्थवतां शब्दानां नानार्थेषु समयो ज्ञातः, तेनैव प्राकरणिका अप्राकरणिकाश्चार्था ज्ञायन्ते, येन त तत्तत्पदानां ज्ञाता अप्यर्थाः पश्चाद्विस्मृताः तेनाप्राकरणिकस्यार्थस्यावगतिर्न क्रियते। सङ्केतज्ञानञ्चाभिधयेत्यत्र नास्ति संशयः। एवं ज्ञातसङ्केतस्य पश्चाच्च विस्मृतसङ्केतस्य पुरुषस्य बुद्धावप्राकरणिकार्थसमुल्लासो व्यञ्जनयापि न शक्यसम्पादः। अतो व्यर्थो व्यञ्जनां प्रत्याग्रहः।[1]

इत्थं पण्डितराजेन नानार्थकशब्दस्थले व्यञ्जनया अप्राकरणिकार्थप्रतीतिरिति प्राचां प्रोद्घोषितः सिद्धान्तः प्रबलयुक्तिप्रमाणेन जर्जरीकृतः पश्चाच्च प्रकारान्तरेण स्वकीयः सिद्धान्त एवं व्यवस्थापितः।

### शाब्द्या व्यञ्जनाया विषये पण्डितराजजगन्नाथस्य स्वीयं मतम्

योगरूढस्थले रूढिर्योगाद्बलीयसीत्येन न्यायेन रूढ्यर्थस्य प्राथमिक्यवगतिरित्यत्र न कस्यचिद्विप्रतिपत्तिः। शब्दादेव प्रमितः (ब्रह्मसूत्रम्, 1, 3, 24) इति ब्रह्मसूत्रप्रमाणं

---

[1] इत्थ च नानार्थस्थलेऽपि तात्पर्यधिय कारणतायां शिथिलीभवन्त्याम् अतात्पर्यार्थविषयशाब्दबुद्धिसम्पादनाय व्यक्तिस्वीकारोऽनुचित एव, शक्त्यैव बोधद्वयोपपत्तेः। -पण्डितराजजगन्नाथ- रसगङ्गाधर, पृ 140।

रूढ्यर्थस्य प्राथमिकीमुपस्थिति द्रढयति। तथाहि ईशानो भूतमव्यस्य स एवाद्य स उ श्वः इत्यत्रेशानशब्दो जीवार्थबोधकः परब्रह्मरूपार्थाभिधायको वेति संशये योगमर्यादया ऐश्वर्यविशिष्टे जीवरूपिण्यर्थ उपस्थिते शब्दादेव प्रमितः इति सूत्रबलादीनाशानशब्दस्य परं ब्रह्मेत्येव रूढ्यर्थो गृह्यते। अयमाशयः। ईशानशब्दः परमात्मन्यर्थे योगरूढः। अतः केवलयोगमर्यादया ऐश्वर्यविशिष्टजीवरूपार्थप्रतीतिर्निरुध्यते, रूढेर्योगापहारित्वात्। ततश्च तादृशार्थलाभ इष्टचेत्तदा अभिधाभिन्ना वृत्तिरावश्यकीति उदाहरणस्यास्य पिण्डितार्थः। एवं पङ्कजपदस्य कुमुदाद्यर्थो यौगिकः। परं रूढिमर्यादया असावर्थो नियन्त्रितो भवति, केवलं कमलरूपिणो रूढ्यर्थस्यैव बोधः। अत एव नैयायिकाः पङ्कजपदात् कुमुदकल्हाररूपिणो योगलभ्यस्यार्थस्य प्रतीतिर्लाक्षणिकीति सम्प्रतिपद्यन्ते। अभिधायाः कमलरूपिणि रूढ्यर्थे नियन्त्रणात्। पङ्कजपदस्य संकेतितोऽर्थ आशुबुद्धिसमारूढः कमलरूप एव। पश्चाच्च कुमुदकल्हाररूपिण्यर्थे पङ्कजपदस्य साक्षात् संकेताकरणात् योगलभ्यार्थस्य प्रतीतिर्लक्षणयैव सम्पाद्या।

एतदेवोदाहरणेन विशदीक्रियते-

**अबलानां श्रियं हृत्वा वारिवाहैः सहानिशम्।**
**रमन्ते चपला यत्र स कालः समुपागतः।।**[1]

इत्यत्राबलावारिवाहचपलाः शब्द योगरूढाः। रूढिमदिया एषां शब्दानाभिधया स्त्रीघविद्युद्रूपिरणोऽथा अभिधयाते। एषां शब्दानां साक्षात्तेष्वर्थेषु संकेतात्। परं पश्चात् गाढमरव्युत्पत्तिमसृरणीकृतान्तः करणानां विदग्धानां। हृदयधम्नि योगमर्यादया वारिवाहादीनां पदानां निर्बलधीवरादय असंकेतिता अर्था अपि परिस्फुरति। न च तादृशाना चमत्कारिणमर्थनां समुल्लसो ऽभिधया, तस्याः साक्षात् संकेतिते मेघादिरूपिणि रूढयर्थ परिक्षयात्। अतोऽबलेत्यादीनां शब्दानां यैगिकोऽर्थोऽसंकेतितः शक्तिभिन्नेन व्यापारेणैव प्रतिपाद्यः न चात्र लक्षणा, मुख्यार्थबाधादिलक्षणाहेत्वदर्शनात्। अतः पारिशेष्याद् व्यज्जनयैवासावर्थो द्योत्यः। आसावर्थोऽनुभूयते सहृदयैः चमत्कृतिच्चदधतीति तद्द्योतकः शब्दस्य व्यापारो व्यज्जजनाह्वोऽवश्यमभ्युपेयः।

**चाच्चल्ययोगिनयनं तव जलजानां श्रियं हरतु।**

---

[1] म म पण्डितदुर्गाप्रसाद, जगन्नाथपण्डितराज- रसगङ्गाधर, पृ 143।

**विपिनेऽतिचच्लानामपि च मृगाणां कथं हरति।।**[1]

इत्यत्रापि योगरूढपदेभ्यश्चचच्चलं नायिकानेत्रमचच्चलानांकमलानां श्रियं यद्धरति तदस्मिन्नुपपद्यत एव, परं समधिकचञ्चलानां हरिणानां तिरस्कारस्तेन कथं क्रियते इत्याश्चर्यमिति योऽर्थः प्रतीतिपदवीमधिरोहति, असौ रूढिमर्यादया। परं काव्यानुशीलनपरैः सूक्ष्मज्ञैः सहृदयैरनवधानवतामेव धनापहरणं चौरैः क्रियते, नत्ववधानवतां पुरुषाणामित्यर्थोऽप्यास्वाद्यते। अस्मिन्नपरेऽर्थे जलजादीनां पदानां न साक्षात्संकेतः, कमलादौ रूढेऽर्थे एव तेषां शक्तेर्नियन्त्रणात्। जलजादीनां पदानामज्ञाद्यर्थेषु न रूढिः। अतो रूढिमर्यादया न तेषां प्रतीतिः, परं योगशक्त्या एभ्यः पदेभ्यश्चोराद्यर्थो भासते। अतो रूढार्थप्रत्यायनविरतसामर्थ्याया अभिधाया न तत्र प्रसरः। एवंविधे योगरूढस्थले लक्षणयापि न निर्वाहो मुख्यार्थबाधादिहेतुत्रयाभावात्। अतोऽसंकेतितो योगशक्तिलभ्योऽर्थः केन व्यापारेण समुल्लसेदिति व्यञ्जनावश्यमभ्युपगता भवति।

तथा सति प्राकरणिकाप्राकरणिकार्थविषये उपमाद्यलंकाराणां स्वशब्देनानभिधानाद् व्यङ्ग्यत्वमेव तेषां नाभिधेयत्वम्। यदि योगशक्तिलभ्यस्यार्थस्योपमानोपमेयभाववलम्बिनोऽलङ्कारस्य च प्रतीतौ व्यञ्जनाऽऽवश्यकी, तर्हि वस्तुरूपिणोऽप्राकरणिकार्थस्य प्रतीतिरपि व्यञ्जनयैव भवतीति स्वीकारे न काचिद्धानिः।[2]

एवं पण्डितराजेन जगन्नाथेन प्राचां मम्मटादीनां ध्वनिवादिनां मतं प्रबलयुक्तिपुरस्सरं दृढ़ीकृतम्। शाब्द्या व्यञ्जनायाश्चेत्थं लक्षणमुपन्यस्तम्-

**योगरूढस्य शब्दस्य योगे रूढ्या नियन्त्रिते।**
**धियं योगस्पृशोऽर्थस्य या सूते व्यञ्जनैव सा।।**[3]

---

[1] रसगङ्गाधर, पृ 143।
[2] एव स्थिते नानार्थस्थलेऽप्युपमाया प्राकरणिकाप्राकरणिकार्थगताया प्रतिपत्तयेऽवश्य वाच्यया व्यञ्जनयैवाप्राकरणिकस्याप्यर्थस्य प्रतिपत्तावल क्लिष्टकल्पनयेत्याशयेन प्राचीनैरुक्त नानार्थव्यञ्जकत्वमपि न दुष्यति। - रसगङ्गाधर, पृ 143-144।
[3] रसगङ्गाधर, पृ 146।

पण्डितराजजगन्नाथेनाप्यभिनवगुप्तमम्मटादिदर्शितां दिशमनुसृत्य वस्त्वलंकाराभ्यां शाब्द्या व्यञ्जनाया द्विधा विभाग: कृत:।

**शब्दशक्तिमूलवस्तुध्वनि:**

**राज्ञो मत्प्रतिकूलान्मे महद्भयमुपस्थितम्।**
**बाले, वारय पान्थस्य वासदानविधानत:।।**[1]

अत्र प्रतिकूलान्नृपान्मम महद्भयमत: स्वगृहे वासो देय इति कस्यचिच्छरणार्थिन: प्रार्थना। अयमस्य पद्यस्य वाच्योर्थ:। अनन्तरं कामातुरं मामयमुदीयमानश्चन्द्रो नितरां संतापयतीति कृत्वा उपभोगं देहीति व्यङ्ग्योऽर्थ: परिस्फुरति। अयमर्थो वस्तुरूप: तेन चात्र शब्दशक्तिमूलवस्तुध्वनि:।

अनेन प्रकारेण पण्डितराजजगननाथेनाप्राकृतस्यार्थस्यापि व्यङ्ग्यत्वं सिद्धान्तितम्। यदि कश्चिद् ब्रूयात् रूपकादेरलंकारस्यैव व्यङ्ग्यत्वात् वस्तुरूपिणोऽर्थस्य च व्यङ्ग्यत्वाभावान्नास्त्यत्र शब्दशक्तिमूलो वस्तुध्वनिस्तन्न, चन्द्ररूपिणोर्थस्य राजरूपार्थाच्छादकत्वात्। अतएव नृपार्थकोऽपि राजशब्दश्चन्द्ररूपार्थाभिव्यक्त्यर्थमेव कविना प्रयुक्त:। यदि द्वयोर्नृपचन्द्ररूपिणोरर्थयो: प्रतीतिरेककालिकी स्यात्तदैवोपमानोपमेययोस्तुल्यप्रतीतौ सत्यामुपमाद्यलंकारस्य व्यंग्यत्वं साम्प्रतम्। यतो राजादिपदैश्चन्द्रपक्षसम्बद्धा अर्था एव प्राधान्येन ग्राह्या:, अत: प्रस्तुते उदाहरणवाक्ये उपमानोपमेयभावस्य युगपदनुल्लासात् रूपकादीनामलंकाराणां न प्राधान्येनाभिव्यक्तिरपितु वस्तुरूप्यर्थएवात्र प्राधान्येन व्यङ्ग्य:।[2]

इत्थं पण्डितराजेन नानार्थकशब्दस्थले वस्तुरूपिणोऽर्थस्य व्यङ्ग्यालंकारात् सर्वथा विविक्तो विषय इति प्रमाणीकृत्याप्राकृतस्यार्थस्यापि ध्वननं समुपोद्वलितम्।

**शब्दशक्तिमूलालङ्कारध्वनि:**

**करतलनिर्गलदविरलदानजलोल्लासितावनीवलय:।**

---

[1] तत्रैव, पृ 162।

[2] न चात्र नृपचन्द्रयोरुपमानोपमेयभावो भेदापोहरूप रूपक वा तथास्तिवति वाच्यम्, इह नृपरूपस्यार्थस्य चन्द्ररूपार्थगोपनमात्रार्थमुपात्तत्वेन युगपदुल्लसितोपमानोपमेयकयोरुपमारूपकयोस्तात्पर्यविषयताया अयोगात्। - तत्रैव, पृ. 88।

**धनदाग्रमहितमूर्तिर्जयतितरां सार्वभौमोऽयम्।।**[1]

अत्राभिधायां गजरूपार्थे नियन्त्रितायां सत्यामप्राकरणिक इन्द्रदेवरूपोऽर्थौ व्यङ्ग्योऽसम्बद्धो मा भूदिति कृत्वा प्राकरणिकाप्राकरणिकयोरर्थयोरुपमानोपमेयभावेनावस्थानम्। तेन चोपमालंकारिध्वनिः।

अनेन पर्यालोचनेन स्फुटं प्रतिपद्यते यच्छाब्दी व्यञ्जना सर्वथा श्लेषव्यतिरिक्ता। इयञ्च द्विविधा वस्त्वलङ्काररूपिणोरर्थयोर्ध्वननादिति सर्वेषां व्यञ्जनावादिनामालङ्कारिकाणामभिमतम्।

### (ख) लक्षणामूला शाब्दी व्यञ्जना

लक्षणा मूले यस्याः सा व्यञ्जना लक्षणामूला। लक्षणासत्वे लक्षणामूलव्यञ्जनासत्वं लक्षणाभावे लक्षणामूलव्यञ्जनाभाव इत्यन्वयव्यतिरेकाभ्यां लक्षणामूला शाब्दी व्यञ्जना लक्षणाश्रितैव। अत एवेयं लक्षणामूलेत्युच्युते।

नन्वभिधामूलायां शाब्द्यां व्यञ्जनायां शब्दस्य पर्यायान्तरेण परिवृत्यसहत्वात्तस्याः शाब्दीति व्यपदेशोऽन्वर्थकः, परं लक्षणामूलायां व्यञ्जनायां 'गंगायां घोषः' इत्यादौ गंगापदस्य भागीरथीत्यादिपर्यायान्तरेण परिवृत्तिसहत्वात् प्रयोजनभूतस्य शैत्यपावनत्वाद्यतिशयरूपिणो व्यङ्ग्यार्थस्य भागीरथीत्यादिपर्यायान्तरप्रयोगेऽपि समुल्लासाच्छाब्दीत्यभिधानं सर्वथानुपपन्नमिति चेन्न, लक्षणामूलाया व्यञ्जनायाः शाब्दीति व्यपदेशे पर्यायान्तरपरिवृत्यसहत्वभिन्नकारणस्याप्यनुसन्धानात्। यतो हि लक्षणामूलाया व्यञ्जनाया शाब्दीति नामकरणं न केवलं पर्यायान्तरपरिवृत्यसहशब्दहेतुकम्, प्रत्युत यथाऽभिधा शब्दस्य व्यापारस्तद्वदर्थनिष्ठापि लक्षणा मूलतः शब्दस्यैव व्यापारः। ततश्च यथा लक्षणा शब्दाश्रिता तथा तन्मूला व्यञ्जनापि शब्दाश्रितेति हेतोः पर्यायान्तरपरिवृत्तिसहत्वेऽपि लक्षणामूला व्यञ्जना शाब्दीत्युच्यते।

किञ्च **'गङ्गायां घोषः'** इत्यादी गङ्गापदं वाचकत्वेनैव पर्यायान्तरपरिवृत्तिसहं नतु लक्षकत्वेन। यदि 'गंगायां घोषः' इत्यनभिधाय 'गंगातटे घोषः' इत्यभिधीयेत, तर्हि

[1] रसगङ्गाधर, पृ 70।

गंगापदस्य लक्षकत्वविघटनाच्छैत्यपावनत्वादीनां प्रयोजनानां न तथा प्रतिपत्तिः। यतो हि गंगापदं यथा लक्षकत्वेन शैत्यपावनत्वादिप्रयोजनान्यवगमयितुं प्रभवति न तथा वाचकत्वेन। अतो लक्षकस्य गंगापदस्य वाचकपदेन परिवृत्तिमसहमानात्कारणाल्लक्षणोत्थापिताया व्यञ्जनाया अपि शाब्दीति व्यपदेशः सम्भवति।

अभिधामूलायां व्यञ्जनायामभिधाव्यञ्जनयोर्नान्वयव्यतिरेकाभ्यामवस्थानम्। तत्राभिधासत्वेऽपि व्यञ्जनाभावो दृश्यते। परं लक्षणायाः प्रयोजनं विनानुत्थानात् प्रयोजनस्य च सर्वदा व्यञ्जनाद्योत्यत्वाल्लक्षणामूला व्यञ्जना लक्षणां विना नावस्थातुमर्हति। अतो लक्षणामूला व्यञ्जना सर्वथा लक्षणापनुप्राणिता लक्षणामुपजीव्य तदुत्थानात्। तद्यथा-

**मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितं**
**समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः।**
**उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरं**
**बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते।।**[1]

कश्चित्तरुणः काञ्चित्तरुणीमवलोक्य तत्सौन्दर्यमुग्धसतां श्लाघते मुखेत्यादिना। अत्र काव्यचारुत्वं लक्षणानुप्राणितव्यञ्जनाजन्यम्। विकसितवशितसमुच्छलितमुकुलितोद्धुरादयः शब्दा लाक्षणिकाः। विकासस्य पुष्पधर्मस्य स्मिते, वशीकरणस्य चेतनधर्मस्य प्रेक्षिते, ऊर्ध्वगतिविशेषरूपसमुच्छलनस्य मूर्तद्रवधर्मस्य विभ्रमे, मुकुलितत्वस्य पुष्पधर्मस्य स्तनयोः, उद्धुरत्वस्योत्कृष्टधुरावत्वरूपस्य चेतनधर्मस्य जघने बाधितत्वात्। ततो लक्षणया विकसितादिपदैर्बाधितस्वार्थैः सातिशयत्वस्वाधीनत्वबाहुल्यकाठिन्यविलक्षणरतियोग्यत्वादयोऽर्थाः क्रमेण लक्ष्यन्ते। व्यञ्जनया च लक्षणायाः प्रयोजकीभूतानि सौरभयुक्तानुरागसकलमनोहारिताऽऽलिङ्गनयोग्यत्वरमणीयत्वादीनि द्योत्यन्ते। अत्र व्यञ्जनैतानि रमणीयत्वादीनि व्यंग्यानि लक्षणां निमित्तीकृत्य बोधयति, लाक्षणिकपदाभावे प्रयोजनस्याननुभवात्। अतो लक्षणामुखेन व्यञ्जनायाः सौरभसकलमनोहारितादिगूढार्थप्रत्यायनाल्लक्षणामूला शाब्दी व्यञ्जना। यथा वा-

[1] करमकर, दामोदररघुनाथ, मम्मट-काव्यप्रकाश, पृ 56।

**स्निग्धश्यामलकान्तिलिप्तवियतो बेल्लद्बलाका घना**
**वाता: शीकरिण: पयोदसुहृदामानन्दकेका: कला:।**
**कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे**
**वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव।।**[1]

अत्र लिप्तसुहृद्रामादय: शब्दा उपचरिता:, वियति लेपनस्य पयोदे चाचेतने सौहार्दस्यानन्वयात्। अत एवानन्विता इमे लक्षणया सम्पर्कोपकारित्वादिकमर्थं लक्षयन्ति। तेन चातिशयप्रत्यायनं व्यंग्यत्वं व्यक्तिवेद्यं विदग्धानां प्रतीतिपदवीमधिरोहति। रामशब्देनाप्युपचरितेनानुपयुज्यमानस्वार्थेन राज्यनिर्वासनाद्यसंख्येयं प्रयोजन व्यज्यते लक्षणामुखेन। अन्वितं मुख्यं शब्दं परित्यज्य अमुख्यानन्वितपदप्रयोग: सर्वदा प्रयोजनप्रत्यायनार्थमेव। तच्च प्रयोजनमभिधाव्यापारेणाशक्यसमर्प्यम्, शब्दानां तत्र संकेताभावात्। एतत् प्रयोजनं लक्षणयापि न प्रत्याययितुं शक्यते, तस्य लक्षणाया: प्रयोजकत्वात्। अत: पारिशेष्याद् ध्वननव्यापारद्योत्यमेव तत् प्रयोजनमिति लक्षणामूला शाब्दी व्यञ्जना सर्वथा लाक्षणिकशब्दोत्थापिता विभाव्या। तल्लक्षणं विश्वनाथाचार्येणेत्थमुपनिबद्धम्-

**लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्।**
**यया प्रत्याय्यते सा स्यात् व्यञ्जना लक्षणाश्रया।।**[2]

लक्षणायां प्रयोजनं सर्वथा व्यञ्जनाबोध्यमत: प्रयोजनवत्या लक्षणाया ये भेदा भवन्ति तेषु सर्वत्र व्यञ्जनाप्रसर:। तथा सति प्रयोजनवत्या लक्षणाया विश्वनाथाचार्यप्रोक्तदिशा चतुष्षष्टिर्भेदा भवन्ति। एवमेव लक्षणामूलाया व्यञ्जनाया मूलाया अपि चतुष्षष्टिर्भेदा उपपादयितुं शक्यन्ते। यद्यपि ध्वनिवादिभिराचार्यैर्लक्षणामूलाया व्यञ्जनाया अयं भेदप्रपञ्चो न प्रदर्शित:, तथाप्येतासु चतुष्षष्टिसंख्याकासु लक्षणासु प्रयोजनस्य व्यञ्जनागम्यत्वाल्लक्षणामूलाया व्यञ्जनाया अप्येते भेदा नूनं सम्भाव्यते एवेति मामकीनं सप्रश्रयं मतम्। ध्वनिवादिभिराचार्यै: केवलं प्रपञ्चिता:। एतेषां सर्वेषां भेदानां

[1] शास्त्री, पण्डितपट्टाभिराम, आनन्दवर्धन-ध्वन्यालोक, पृ 167।
[2] विश्वनाथ, साहित्यदर्पण, 1, 15।

विवेचनमत्र प्रकृतानुपयोगान्न सम्भाव्यते। अतः केवलमविवक्षितवाच्यापरपर्यायस्य लक्षणामूलध्वनेरर्थान्तरसंक्रमितवा- च्यात्यन्ततिरस्कृतवाच्यौ द्वावेव भेदौ प्रदर्श्येते। उभयत्र व्यङ्ग्यार्थस्य लक्षणामूलया शाब्द्या व्यञ्जनया द्योत्यत्वात्। अवशिष्टेषु सर्वेषु ध्वनिभेदेषु व्यङ्ग्यार्थस्याभिधामूलया व्यञ्जनया द्योत्यत्वात्तेषां विवेचनमत्र न विधीयते।

अविवक्षितवाच्यध्वनौ व्यंग्योऽर्थो लक्षणमूलया शाब्द्या व्यञ्जनया द्योत्यः। लक्षणायां वाच्योऽर्थः क्वचिदर्थान्तरे संक्रमितो भवति, क्वचिच्चात्यनतं तिरस्कारमुपयाति। अतो वाच्यार्थस्यान्यत्रसंक्रमणादत्यन्ततिरस्काराच्चाविवक्षितवाच्यो ध्वनिर्द्विविधः। अर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्च।[1]

**लक्षणामूलोऽर्थान्तरसङ्क्रमितवाच्यो ध्वनिः**

यत्र वाच्योऽर्थः स्वार्थे सम्भवन्नपि तात्पर्योपपत्तये लक्ष्यार्थे स्वात्मानं समर्पयति, ततश्च प्रयोजनरूपिणोऽर्थस्य प्रतीतिर्व्यञ्जनया लक्षणामूलया, तत्रार्थान्तरसंक्रमितवाच्यो ध्वनिः। तद्यथा-

**तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते।**
**रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि।।**[2]

अत्र द्वितीयः कमलशब्दो मुख्यार्थे सम्भवन्नपि तावतानुपयोगाल्लक्ष्मीपात्रत्वविकसितत्वसौरभत्वाद्यपरेऽर्थे आत्मानमर्पयित्वा तादृशगुणविशिष्टं कमलं, नतु साधारण कमलरूपिणमभिधेयमर्थं लक्षणासहकारितया अभिव्यनक्ति। अतोऽत्र कमलरूपिणोऽर्थस्य सौरभादिगुणविशिष्टकमलरूपिण्यर्थान्तरे संक्रमणात् अर्थान्तरसंक्रमितवाच्यो लक्षणामूलः शाब्दो ध्वनिः।

**लक्षणामूलोऽत्यन्ततिरस्कृतवाच्यो ध्वनिः**

---

[1] अर्थान्तरे सङ्क्रमिते वाच्येऽत्यन्त तिरस्कृते।
अविवक्षितवाच्योऽपि ध्वनिर्द्वैविध्यमृच्छति।। -विश्वनाथ, साहित्यदर्पण, 4, 3।
[2] शास्त्री, पण्डितपट्टाभिराम, आनन्दवर्धन-ध्वन्यालोक, पृ 170।

यत्र वाच्योऽर्थो बाधितः स्वार्थप्रतीतिं कारयित्वोपरतो भवति, अन्येऽर्थे न नोपसंक्रमते, तत्र वाच्यार्थस्यात्यन्ततिरस्कारात् अत्यन्ततिरस्कृतवाच्योध्वनिर्लक्षणामूलः। तद्यथा-

**रविसङ्क्रान्तसौभाग्यस्तुषारावृतमण्डलः।**
**निश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते।।**[1]

अत्रान्धाशब्दः सर्वथा स्वार्थे बाधितः। आदर्शस्य नेत्ररहितत्वात्। नेत्रवत एवान्धता दृष्टिनाशाज्जायते नत्वनेत्रस्यादर्शादिकस्य जडवस्तुनः। एवमन्धशब्दः स्वार्थमभिधाय विरमति। ततो नष्टदृष्टिर्यथा न कञ्चन पदार्थं द्रष्टुं पारयति, तथा निश्वाससमाच्छन्ने आदर्शेऽपि न पदार्थस्फुटीकरणशक्तिरिति लक्ष्यार्थावगत्यनन्तरं चन्द्रमसोऽसाधारणविच्छायत्वानुपयोगित्वादिधर्मजातं लक्षणायाः प्रयोजनायितं लक्षणामूलया व्यञ्जनयाऽभिव्यक्तं भवति। अत्रान्धशब्दः स्वार्थे बाधितोऽपरस्मिन्नर्थेऽनुपपन्नः स्वार्थं प्रत्याय्य पलायते इव, अतो वाच्यार्थस्यात्यन्ततिरस्कारादत्यन्ततिरस्कृतवाच्यो लक्षणामूलो ध्वनिः।

नन्वभिधामूलायां शाब्द्यां व्यञ्जनायां शबदस्य पर्यायान्तरेण परिवृत्यसहत्वेपि अर्थस्य व्यञ्जकता न निराकर्तुं शक्यते, काव्यस्य शबदार्थोभयरूपत्वात्, शब्दस्यार्थं विना अर्थस्य च शब्दं विनावस्थातुमसम्भवत्वादतः शब्दव्यञ्जकतायामर्थस्याप्यपेक्षणाच्छाब्दीति व्यपदेशोऽयुक्त इति चेन्न, प्राधान्येन व्यपदेशा भवन्तीति न्यायाच्छब्दस्य प्राधान्येन व्यञ्जकतायां शाब्दीतिव्यपदेशस्योपपन्नत्वात्। अयमाशयः- शाब्द्यां व्यञ्जनायामर्थस्यापि सहकरितवेनापेक्षा यद्यप्यशक्यशङ्का, अर्थं विना शब्दस्यानवस्थनात्तथापि शाब्द्यां व्यञ्जनायां शब्द एव प्राधान्येन व्यञ्जकोऽर्थस्तु केवलं सहकारी। अतोऽर्थस्य व्यञ्जकतायामपि शब्दव्यञ्जकतायाः प्राधान्याच्छब्दमुखेन व्यपदेशः।[2]

[1] तत्रैव, पृ 172।
[2] केवल शब्दशक्तिरुद्भटाऽर्थशक्तिस्तु तामेवानुप्राणयतीति नार्थशक्तिमूलो व्यवहार। - श्रीशिवप्रसाद., मम्मटकाव्यप्रकाश., दीपिका टीका, पृ 74।

अर्थस्य प्राधान्येन व्यञ्जकतायामार्थी व्यञ्जना। अर्थास्तु वाच्यलक्ष्यव्यङ्ग्यरूपास्त्रिविधाः।[1] एषामर्थानां व्यञ्जकत्वे व्यञ्जनरूप आर्थो व्यापार एवार्थी व्यञ्जना। वाच्यलक्ष्यव्यङ्ग्यरूपास्त्रिविधा अर्था वक्तृबोद्धव्यादीनामुपाधीनां सहकारितया व्यञ्जका भवन्ति, अतोऽर्थस्य व्यञ्जकता सर्वदौपाधिका। अत एवार्थ्या व्यञ्जनाया लक्षणमुपनिबध्नद्भिरलंकारिकैर्वक्तृबोद्धव्यादीनां सहयोगेनार्थस्य व्यञ्जकता प्रतिपादिता। उपाधिनिरपेक्षोऽर्थो व्यङ्ग्यमर्थं ध्वनयितुं न प्रभवतीत्यार्थ्यां व्यञ्जनायामुपाधीनां परमापेक्षा। एवं वक्तृबोद्धव्याद्युपाधिभिः सहकृतो व्यङ्ग्यार्थद्योतक आर्थो व्यापार आर्थी व्यञ्जनेति लक्षणं पर्यवस्यति।[2]

आर्थ्या व्यञ्जनाया उदाहरणं तावन्निम्नलिखितप्रकारेणावगन्तव्यम्।

**निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो**
**नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।**
**मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे**
**वापीं स्नातुमितो गतासि न पुनस्तस्याधर्मस्यान्तिकम्।।**[3]

अत्र काचिन्मदनशरासारविदीर्यमाणहृदया विदग्धा नायिका नायकाऽऽनयनाय प्रेषितां तमुपभुज्यागतामकृतज्ञां दूतीमुपालभते व्यञ्जनासाह्येन। यद्यपि नायिका निश्शेषच्युतचन्दनादिभिश्शब्दैः स्नानचिह्नानि निर्दिशति, तथापि व्यङ्ग्यरत्नवैकटिकैर्वक्तृबोद्धव्यवैशिष्ट्यान्नायकोपभोगरूपोऽर्थः कामिनीकुचकलशवद्गूढः प्रतीयमानः सन्नास्वाद्यते।

विदग्धा नायिका कृतापराधां दूतीं भर्त्सयति यत्वं नायकमनुपगम्य स्नानार्थं वाप्यामवतीर्णासि। अत एव स्तनतटाच्चन्दनस्याधराच्च रागस्य विलोपः। अयं वाच्योऽर्थो वक्तृबोद्धव्यवैशिष्ट्यान्नायकोपभोगरूपिणमर्थमभिव्यनक्ति। नहि काचिदुत्तमा विदग्धा

---

[1] (क) अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मत। विश्वनाथ, साहित्य-दर्पण, 2, 2। (ख) मुख्योपयरितव्यङ्ग्या क्वचिदर्थास्त्रयोऽप्यमी। विभ्रतिव्यञ्जकीभाव निजप्रागल्भ्यसम्पदा।। नरेन्द्रप्रभसूरि अलङकार - महोदयि 3, 8।

[2] वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययो।
प्रस्तावदेशकालाना काकोश्चेष्टादिकस्य च।
वैशिष्ट्यादन्यमर्थं या बोधयेत् साऽर्थसम्भवा।। - विश्वनाथ, साहित्यदर्पण, 2, 16।

[3] करमकर, र दा मम्मट-काव्यप्रकाश, पृ 20।

नायिका नायकमधमपदेन निन्दति। अत: स्नानरूपिण्यर्थे उपात्तानि निश्शेषच्युतचन्दनादीनि विशेषणानि सम्भोगार्थगमकानि।[1]

एवञ्च निश्शेषच्युतचन्दनादीनां पदानां पर्यायान्तरेण विपर्ययेपि कृते वक्तृबोद्धव्यमहिम्ना भावुकानां चेतसि नायकोपभोगरूपो व्यङ्ग्योऽर्थ: परिस्फुरति। अत: शब्दस्य परिवृत्तिसहत्वात् पर्यायान्तरप्रयोगे चाप्यर्थस्य ध्वननादर्थनिष्ठा व्यञ्जनार्थी।

वाच्यलक्ष्यव्यङ्ग्यरूपाणामर्थानां त्रैविध्यादार्थी व्यञ्जना त्रिविधा। वाच्यार्थसम्भवार्थी व्यञ्जना, लक्ष्यार्थसम्भवार्थी व्यञ्जना, व्यङ्ग्यार्थसम्भवार्थी व्यञ्जना चेति।[2]

## (क) वाच्यार्थसम्भवार्थी व्यञ्जना

यत्राभिधयाऽभिहितो वाच्यार्थो व्यञ्जक: सन् व्यञ्जनामुत्थापयति तत्र वाच्यार्थसम्भवार्थी व्यञ्जना। वाच्यार्थसम्भवायामार्थ्यां व्यञ्जनायां वाच्योऽर्थो व्यञ्जनाया मूलम्। अतो वाच्यार्थसम्भवेयं व्यपदिश्यते। तद्यथा-

**मातृर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया।**
**तद् भण किं करणीयमेवमेव न वासर: स्थायी।।**[3]

इत्यत्रान्नेन्धनादिगृहोपकरणानयनव्याजेन परपुरुषसम्भोगरसिका काचिदविनयवती पूज्यां वृद्धां प्रार्थयते बहिर्गमनानुमतिप्रदानार्थम्। कामिनीरूपवक्तृवैशिष्ट्यवशात् वाच्यार्थादस्मात् स्वैरविहारार्थिनीयं स्त्रीति व्यज्यते। अयमाशय:। प्रस्तुते पद्ये प्रतिभावान् सहृदय: मातर्गृहोपकरणादीनां शब्दानामभिधया सङ्केतितानर्थानवबुध्य नायिकाया वक्त्र्या वैशिष्ट्यात् तस्या: स्वैरोपभोगाभिलाषं गूढमवगच्छति। यदि वक्त्री सद्गृहिणी स्यात्तदा नापरस्यार्थस्य परपुरुषसम्भोगाभिलाषरूपिणो ध्वननम्। अतो व्यञ्जनाया: समुल्लासे वक्तृवैशिष्ट्यमत्र निबन्धनम्। स्वैरविहाररूपोऽर्थो गूढस्तत्तच्छब्दानां संकेतितेभ्यो

---

[1] एव विदग्धाया गूढतात्पर्यवाचोयुक्त्या साधरणे ष्वेतेषु वाक्यार्थेष्वगतेषु विदग्धोतमनायिकात्वदु शीलत्वादिरूपवक्तृबोद्रव्यवैशिष्ट्यबलाद धम पदार्थो दु खप्रयोजककर्मशीलत्वरूप साधारणो वाच्यता दशाया तादृशकर्मान्तरशीलत्वरूपेणावस्थितो व्यञ्जनया दूतीसम्भोगरूपतार्दशकर्मशीलत्वाकारेण पर्यवस्यति। पण्डितदुर्गाप्रसाद, गोविन्दकृत काव्यप्रदीप, उदाहरणचन्द्रिका, पृ 13।

[2] (क) त्रैविध्यादियमर्थाना प्रत्येक त्रिविधा मता।
विश्वनाथ., साहित्य-दर्पण, 2,17,
(ख) वाच्यमुला व्यञ्जनैषा लक्षणा प्राक प्रदर्शिता।
उदाहृतेषु दूरार्थभाने व्यङ्ग्यताप्यसौ ।। शुक्ल, श्रीकालिकाप्रसाद, आशाधरभट्टविरचित. कोविदानन्द कारिका 18।

[3] करमकर, रघु दा, मम्मटकृत काव्यप्रकाश, पृ 28।

वाच्यार्थेभ्य एवावगतो भवति, अतोऽत्र वाच्यार्थस्य व्यञ्जकत्वं निर्बाधम्। तथा सति वाच्यार्थसम्भवेयमार्थी व्यञ्जना।

अत्र वाच्यार्थद्योतितस्य स्वैरविहाररूणिणोऽर्थस्य प्रतीतिर्न वैयञ्जनिकीति न शङ्क्यम्। 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति वृद्धोक्तनयमनुरुध्य वाच्यार्थमात्रबोधविरतसामर्थ्याया अभिधाया व्यङ्ग्यार्थप्रत्यायने दुर्बलत्वात्। मुख्यार्थबाधाद्यभावे लक्षणायाश्चाप्रवृत्तेः। अतः पारिशेष्यात् ध्वननव्यापारसिद्धैव स्वैरविहाररूपिणोऽर्थस्य प्रतीयमानस्यावगतिः। एतच्चास्माभिरभिधावादिनां मीमांसकानां मतविवेचनसमये सप्तमेऽध्याये वितत्य प्रदर्शितमिति तत एवावधार्यम्।

वाच्यार्थसम्भवेयमार्थी व्यञ्जना वक्तृबोद्धव्यादीनामुपाधीनां वैशिष्ट्यादेव व्यङ्ग्यार्थप्रत्यायने प्रभवति।[1] अतो वक्त्रादीनामुपाधीनां भेदेन वाच्यार्थसम्भवा व्यञ्जना पुनर्भिद्यते। तद्यथा- 1. वक्तृविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना 2. बोद्धव्यविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना 3. काकुविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना 4. वाक्यविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना 5. वाच्यविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना 6. अन्यसन्निधिविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना 7. प्रकरणरूपप्रस्तावविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना 8. देशविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना 9. कालविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना 10. चेष्टाविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना।

## (1) वक्तृविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना

वक्तुर्वैशिष्ट्याद् वाच्यार्थस्य व्यञ्जकत्वे वक्तृविशिष्टा वाच्यसम्भवाऽऽर्थी व्यञ्जना। तद्यथा-

**अतिपृथुलं जलकुम्भं गृहीत्वा समागताऽस्मि सखि त्वरितम्।**
**श्रमस्वेदसलिलनिश्वासनिः सहा विश्राम्यामि क्षणम्।।**[2]

---

[1] वक्तबोध्यव्यकाकुना वाक्यवाच्यान्यसन्निधे।
प्रस्तावदेशकालादेवैशिष्ट्यात् प्रतिभाजुषाम। योऽर्थस्यान्यार्थधीहेतुव्यापारो व्यक्तिरेवसा। मम्मट, काव्यप्राकश, 3, 21-22।

[2] करमकर, र दा, मम्मटकृत काव्यप्रकाश, पृ 73।

अत्र काचिद्विदग्धा नायिका गहनवनप्रदेशे उपपतिना सह सुरतसुखमनुभूय यदा गृहं प्रतिनिवर्तते, तदा तस्याः प्रच्छन्न उपपतिभोगः प्रकाशतां नोपेयादिति शङ्कया प्रतिवेशिनी सखीं सम्बोध्यासौ कथयति यच्छ्रमस्वेदसलिलनिश्वासादीनि मम वपुषि लक्ष्यमाणानि चिह्नानि सम्भोगगमकानि न विभाव्यानि। प्रत्युत अपिपृथुलो जलेन परिपूर्णोऽयं घटोऽतिदुर्वहः। अयं मयैवोढः न व्यन्यया कयाचित् साहाय्यमाचरितमित्यायासवशान्निश्वासः। गृहव्यापारसम्पादनत्वरया मार्गे विश्राममकृत्वा त्वरितगतयाहमतिपृथुकमपीमं घटं कथञ्चित् स्वस्कन्धे वहन्ती अत्रोपस्थिता, अता महानायासस्तेन च धर्मसलिलप्रस्रवणम्।

अत्र पुंश्चल्याः प्रच्छन्न उपपतिसम्भोगो वक्त्र्या वैशिष्ट्यादेवाभिव्यक्तो भवति। इहान्वयनिमित्तभूते श्रमस्वेदसलिलनिश्वासाद्यर्थेसुस्थितेऽपि अन्वयाद्बहिः कृतोऽर्थान्तर उपपतिरमणरूपो वक्त्र्या वैशिष्ट्यादेव ध्वनितो भवति। यद्यत्र वक्त्री साध्वी स्त्री वृद्धा वा स्यात्तदा धर्मसलिलादिशब्देभ्यो वाच्यार्थमात्रप्रतीते र्न काचिच्चमत्कृतिः। परं वक्त्र्या पुंश्चल्या वैशिष्ट्यादेवात्र वाच्यार्थात् परपुरुषपभोगरूपो व्यङ्यार्थसमुल्लासे सति वक्तृविशिष्टा वाच्यसम्भवार्थी व्यञ्जनात्र स्फुटा।

### (2) बोद्धव्यविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना

यत्र व्यङ्ग्यार्थावगतिर्बोद्धव्याया व्यक्तेर्ज्ञाननिबन्धिनी, तत्र बोद्धव्यस्य वैशिष्ट्याद् बोद्धव्यविशिष्टा व्यञ्जना। यमुद्दिश्य वक्त्रा वाक्यमुदीर्यते तस्य स्वभावादिकस्य ज्ञानेनैव व्यङ्ग्यार्थावगतौ बौद्धव्यविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना। तद्यथा-

**औन्निद्र्यं दौर्बल्यं चिनतालसत्रं सनिश्वसितम्।**
**मम मन्दभागिन्याः कृते सखि त्वामप्यहह परिभवति।।**[1]

अत्र नायकमुपभुज्यागतां कृतघ्नां वयस्यां प्रति नायिकाया उक्तिरियम्। नायिकाया अनया दुश्चरित्रया वयस्यया तद्वल्लभं संभुज्य नायिकां प्रत्यनार्यमाचरितम्। अतो बोद्धव्यायाः सख्या वैशिष्ट्याद् वाच्यार्थमुपसर्जनीकृर्वन् प्रच्छन्नों नायिकावल्लभचौर्यरतिरूपो व्यङ्ग्योऽर्थो बोद्धव्यवैशिष्ट्यवशात् प्रतिभावतां सचेतसां मनस्सु परिस्फुरति। यद्यत्र

[1] करमकर, र दा, मम्मटकृत काव्यप्रकाश, पृ 73।

बोद्धव्याया दूत्या असद्भावः पूर्वमवगतो न स्यात्, तत्स्थाने च प्रतिपाद्या निसर्गसद्भावप्रवृत्ता साध्वी स्त्री भवेत्तदार्थान्तरप्रतीतिर्न भवेत्। प्रत्युत तथा सति श्लोकार्थस्य वाच्यार्थे एव विश्रान्तिः। यदि बोद्धव्या सखी वस्तुतो नायिकोपकाररता अहर्निशञ्च तत्कृते क्लिश्नाति, तदा कामुकोपभोगरूपिणो व्यङ्ग्यस्यास्य नावभासः। आते बोद्धव्यायाः सख्याः वैशिष्ट्याच्चौर्यरतिरूपिणोऽर्थस्यानुरणनाद् बोद्धव्यविशिष्टेयं वाच्यसम्भवा आर्थी व्यञ्जना।

### (3) काकुविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना

'भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते' इति काकुलक्षणम्। तेन काकुः कण्ठविकारः। यत्र विशेषकण्ठध्वनिनैव वाक्ये उच्चरिते व्यङ्ग्यार्थावगतिर्भवति, तत्र काकोर्वैशिष्ट्याद् व्यङ्ग्यार्थावगतौ काकुविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना। तद्यथा-

**तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां**
**वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः।**
**विराटस्यावासे स्थितमनुचितारम्भनिभृतं**
**गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु।।**[1]

अत्र काक्वा मयि न योग्यः खेदः कुरुषु तु योग्य इति व्यङ्ग्यार्थस्य प्रतीतिः।

प्रस्तुते पद्ये नाद्यापि कुरुषु इत्यत्र 'न' पदे काकुः। विशेषकण्ठध्वनिनैवास्योच्चारणे कृते सति, कुरुषु योग्यः खेदो युधिष्ठिरस्य ज्येष्ठभ्रातुर्नतु मयि भीमसेने इति व्यंग्यार्थस्यावागतिः। यद्ययं पद्यखण्डः काकुं विना साधारणेन स्वरेण प्रोच्यते, तदा कण्ठविकाराभावे, गुरुर्खिन्ने मयि खेदं भजति, अद्यापि कुरुषु न भजतीत्यस्य साधारणस्य विच्छित्तिविशेषशून्यस्यार्थस्यावगतिः। अतः क्रुद्धस्य भीमसेनस्य सहदेवं प्रति प्रोक्तमिदं वचनं नाद्यापीति काक्वैवोच्चरितं सद् व्यंग्यार्थप्रत्यायनक्षमं भवति। अयमभिप्रायोऽत्र भीमसेनस्य। भीष्मपितामहद्रोणाचार्यादीनां पूज्यानां वृद्धानामुपस्थितौ, दुष्टेन नराधमेन दुर्योधनेन अस्माकं भार्या द्रौपदी विवसना कृता, तत्पीडितैरेवास्माभिः पाण्डुपुत्रैः वल्कलमात्रवसनधारिभि र्गहनेषु वनेषु भ्रमद्भिरनन्तानि दुःखान्यनुभूतानि।

[1] तत्रैव, पृ. 74।

अतः प्रतिज्ञातशतकौरववधे, दुश्शासनापकारप्रत्युद्धारकृतपरिकरे मयि भीमसेने, ज्येष्ठभ्रातुर्युधिष्ठिरस्य कोपः कथमपि न न्याय्यः प्रत्युताततायिनि दुर्योधने एव कोपः प्रकटनीयो येन वैरोद्धारो भवेदिति सर्वो व्यंग्योऽर्थो घण्टानिह्लादस्थानीयो 'न' इति काक्वैव ध्वन्यते। तदभावे वाच्यार्थमात्रविश्रान्तौ का सरसता?

ननु काक्वा व्यंग्यार्थस्य प्रत्यायने काक्वाक्षिप्तं गुणीभूतव्यंग्यमत्र वाच्यं नतु ध्वनिरिति चेन्न, अनुपपद्यमानस्य वाच्यार्थस्य काक्वा सुसंगतावेव, काक्वाक्षिप्तगुणीभूतव्यंग्यत्वात्, अतथात्वे च ध्वनिकाव्यत्वात्। तथाहि-

**मथनामि कौरवशतं समरे न कोपाद्**
**दुश्शासनस्य रुधिरं न पिबाम्युरस्तः।**
**सञ्चूर्णयामि गदया न सुयोधनोरू**
**सन्धिं करोतु भवतां नृपतिः पणेन।।**[1]

इत्यत्र दुश्शासनदुर्योधनकौरवविनाशोद्यतस्य भीमसेनस्य 'न पिबामि न सञ्चूर्णयामी'ति वचनमनुपपन्नम्। अतः काक्वैव कौरवशतसंहारमाचरिष्यामि दुर्योधनस्योरूभङ्गमपि विधास्यामीत्यर्थस्य प्रतीतिः। सा च काक्वा विना न सम्भवति। अतः काकुबलेनैव काव्यार्थस्योपपत्तिः। काकुमहिम्नावसीयमानो व्यङ्ग्योर्थोत्र स्वात्मनि विश्रान्तिं न भजति, प्रत्युत प्रत्यावृत्य वाच्यार्थमेवोपस्करोति, अतो गुणीभूतव्यंग्यत्वं काक्वाक्षिप्तमत्र निर्बाधम्।

परं काकुविशिष्टव्यञ्जनायां न तादृशी वार्ता, यादृशी काक्वाक्षिप्तगुणीभूतव्यंग्ये। काकुविशिष्टव्यञ्जनायां काक्वा वाच्यार्थे एव विश्रमः। अतो व्यंग्यार्थस्य प्राधान्येनावस्थानात्, वाच्यार्थस्य च प्रत्यावृत्य तदुपस्कारकरणात्, ध्वनिकाव्यमक्षुण्णम्। तथाहि- 'गुरुः खिन्ने मयि खेदं भजति (किम्) अद्यापि कुरुषु न खेदं भजति किम' इत्यत्र वाच्यं प्रश्नमात्रेणापि सिद्धं भवति। अतः प्रश्नमात्रेण विश्रान्तिशयनाङ्कमधिशयानापि काकुर्यदा अवान्तरस्य व्यंग्यार्थस्य ध्वनने सहकारिणी भवति, तदा वद्वैशिष्ट्यात् व्यञ्जनायास्तादृशं नामकरणम्। काकुविशिष्ट्यां व्यञ्जनायां

[1] काव्यप्रकाश, पृ 120।

काकुप्रत्यायितस्य व्यंग्यार्थस्य न वाच्ये विश्रान्तिः। नापि च तत्कृता वाच्यार्थशोभा, प्रत्युत व्यंग्यार्थः प्राधान्येन चकासन्नलंकार्यत्वेनावतिष्ठते। अतो न तत्र गुणीभूतव्यङ्ग्यशङ्का। यदि काकुविशिष्टायां व्यञ्जनायां काक्वा वाच्योर्थो उपपन्नो भवेत्, तदेव काक्वा ध्वन्यमानस्य व्यंग्यार्थस्य वाच्यार्थ प्रत्युपस्कारकत्वेनावस्थानात् गुणीभूतव्यंग्यत्वमुपपन्नं भवेत्। परं यदा प्रश्नमात्रं अभिव्यज्य काकुर्विश्राम्यति, तदा पूर्वोदाहृते ध्वनिकाव्ये वाच्यार्थपर्यवसायी यो व्यंग्यार्थः प्रतीतिपदवीमधिरोहति, असौ ध्वनिरेव। व्यञ्जना चात्र काकुसहकृता व्यंग्यार्थ ध्वनयतीति कृत्वासौ काकुविशिष्टोच्यते।

तथा चोक्तं मम्मटभट्टेन-

**'न च वाच्यसिद्ध्यङ्गमत्र काकुरिति गुणीभूतव्यङ्ग्यत्वं शङ्क्यम्। प्रश्नमात्रेणापि काकोर्विश्रान्तेः।'**[1]

### (4) वाक्यविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना

यत्र व्यंग्योऽर्थः प्रयुक्तस्य वाक्यस्य वैशिष्ट्यात् समुन्मिषति, तत्र वाक्यविशिष्टा व्यञ्जना। वाक्यमत्र व्यङ्ग्यार्थोत्थापने सहायकम्। अतो वाक्यवैशिष्ट्येन व्यंग्यार्थप्रतीतौ वाक्यविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना।

तद्यथा-

**तदा मम गण्डस्थलनिमग्नां दृष्टिं नानैषीरन्यत्र।**
**इदानीं सैवाहं तौ च कपोलौ न सा दृष्टिः।।**[2]

अत्र 'तदा' 'इदानीम्' 'सा' इत्येतेषां पदानां वैशिष्ट्यात् प्रच्छन्नाकामुकत्वं व्यज्यते, अतो वाक्यविशिष्टेयं व्यञ्जना। काचिन्नायिका स्वसखीसन्निधौ निजकपोलावलोकनपरं नायकं निरीक्ष्य पश्चाच्च स्वसखीप्रस्थानानन्तरं निजकपोलदर्शनव्यावृत्तनेत्रं तमवबुध्योपालभते 'तदि' त्यादिना। अत्र विप्रलब्धाया नायिकाया अयमाशयः। प्राक् मम कपोले प्रतिबिम्बितां मम सखीमवलोकयतस्तव तादृशी दृष्टिरभूत, अधुना तस्यां प्रस्थितायामन्यादृश्येव तव दृष्टिरतस्तव मत्सखीविषयकः

---
[1] काव्यप्रकाश, पृ 75।
[2] काव्यप्रकाश, पृ 75।

प्रच्छन्नानुरागः प्रकाशमायातः। अतः सर्वथा शठोऽसीति व्यंग्यार्थप्रतीतिस्तदेदानीमित्यादीनां पदानां पर्यालोचनया भवतीति वाक्यवैशिष्ट्येन व्यंग्यार्थविभागः।

## (5) वाच्यविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना

वाच्यवैशिष्ट्येन व्यङ्ग्यार्थं प्रत्याययन्ती व्यञ्जना वाच्यविशिष्टा। वाच्यः अर्थोऽत्र व्यंग्यार्थावगतौ निबन्धनतामुपयातीतिकृत्वा वाच्यविशिष्टेयं व्यपदिश्यते। वाक्यविशिष्टायां व्यञ्जनायां वाक्यं व्यंग्यार्थप्रतीतौ सहायकम्। परं वाच्यविशिष्टायां व्यञ्जनायां वाच्योर्थः सहायकः। अतो द्वयोर्भेदः। एवं वाच्यवैशिष्ट्येन व्यंग्यार्थबोधिका वाच्यसम्भवा आर्थी व्यञ्जना। तद्यथा-

**उद्देशोऽयं सरसकदलीश्रेणिशोभातिशायी**
**कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः।**
**किञ्चैतस्मिन् सुरतसुहृदस्तन्वी ते वान्ति वाता**
**येषामग्रे सरति कलिताकाण्डकोपो मनोभूः।।**[1]

अत्र सरसकदलीत्यादिविशेषणविशिष्टस्य नर्मदेति वाच्यार्थस्य वैशिष्ट्यात् रतार्थं प्रविशेति व्यंग्योऽर्थः परिस्फुरति। तथाहि- सरसेत्यादिना शुष्कपर्णाभावे कर्णकटुहृदयोद्वेजकशब्दराहित्यात्, श्रेणीत्यनेन कदलीवृक्षसमुदायाधिक्यात्, केनाप्यदृष्टंस सुखावहं सुरतकर्म भविष्यतीति नर्मदोद्देशः सर्वथानुकूलो विविधसुरतवैचित्र्योपभोगार्थं प्रवेशयोग्यश्चेति ध्वनिर्विशेषविशिष्टवाच्यार्थ वैशिष्ट्यादेव अभिव्यक्तो भवति।

## (6) अन्यसन्निधिविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना

वाक्यस्य वक्तुः श्रोतुर्वैशिष्ट्यातिरिक्तस्यान्यस्य कस्यचित्तटस्थस्य सन्निधिवैशिष्ट्याद् व्यङ्ग्यार्थं द्योतयन्ती व्यञ्जना अन्यसन्निधिविशिष्टा। यावदन्यस्य वक्तुः श्रोतुश्च भिन्नस्य तटस्थस्य कस्यचित् सन्निधिर्न ज्ञायते, तावद् व्यंग्योऽर्थो न परिस्फुरति। अतोऽन्यसन्निधिवैशिष्ट्येन व्यंग्यार्थावगतौ वाच्यसम्भवा आर्थी व्यञ्जना अन्यसन्निधिविशिष्टा। अन्यस्य तटस्थस्य सन्निधिर्व्यङ्ग्यार्थपरिस्फुरणेऽत्र हेतुः तद्यथा-

[1] काव्यप्रकाश, पृ 76।

**नुदत्यनार्द्रमनाः श्वश्रूर्मां गृहभरे सकले।**

**क्षणमात्रं यदि सन्ध्यायां भवति न वा भवति विश्रामः।।**[1]

अत्र काचिच्चतुरा नायिका मदनशरासारदीर्यमाणहृदयं कामातुरमुपपतिं तटस्थतयेव सन्निहितं वीक्ष्य मिलनसमयं ध्वनयति प्रतिवेशिनीसम्बोधनछद्मना। नायिकाया अत्रायमभिप्रायः। अहनि समग्रगृहकार्यसम्पादनावश्यकतया विश्रामाभावः। तेन च दुर्लभो मिलनावसरलाभो दिवसे। सन्ध्यायां गृहकार्यपरिसमाप्तौ वृद्धमातरि प्रीतायां सत्याम्, विश्रामव्याजेन निर्दिष्टमिलनस्थानं प्रति सौकर्येण गमनागमनम्। अतो यावत् पापीयानयं दिवसो नातिक्रामति, तावत्वया कामपीडापरमव्याकुलेनापि सधैर्य समयो यापनीयः। आगतायां सन्ध्यायां विश्रामव्याजेन मिलनं सम्भवमिति तटस्थतया सन्निहितमुपपतिं प्रति विदग्धाया उक्तिः। व्यंग्यार्थोयं तटस्थतया सन्निहितस्योपनायकस्योपस्थितावेव सहृदयैरास्वाद्यते। उपनायकस्यानुपस्थितौ प्रतिवेशिनीं प्रति कथितं पूर्वोक्तं वचनं वाच्यार्थमात्रविश्रान्त सत्तुच्छमनास्वाद्यञ्च। यतः सुरतसङ्केतस्थानजिज्ञासोरुपनायकस्यान्यस्य सन्निधौ तद्वैशिष्ट्यात् सन्निहितमुपपतिं प्रति सुरतसङ्केतसमयोऽनया विदग्धया सूचित इति व्यङ्ग्योऽर्थः सहृदयहृदये चकास्ति।

## (7) प्रकरणरूपप्रस्तावविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना

वक्तुः प्रकरणरूपप्रस्तावविशिष्ट्ये व्यंग्यार्थ द्योतयन्ती व्यञ्जना प्रकरणरूपप्रस्तावविशिष्टा। अत्र वक्तुः प्रस्तावो व्यङ्ग्यार्थावगतौ निबन्धनतामुपयाति। अतस्तद्वैशिष्ट्यात् व्यञ्जनाऽर्थं ध्वनयति। एवं प्रकरणरूपप्रस्तावविशिष्ट्येन व्यंग्यार्थावगतौ प्रकरणरूपप्रस्तावविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना। तद्यथा-

**श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण।**

**एवमेव किमिति तिष्ठसि तत् सखि सज्जय करणीयम्।।**[2]

---

[1] काव्यप्रकाश, पृ 77।

[2] काव्यप्रकाश, पृ 77।

अत्रोपनायकमुपभोक्तुं प्रस्थितां नायिकां प्रति तत्सख्या इयमुक्तिः। धनोपार्जनार्थं विदेशं प्रति गतस्तव पतिरधुना विदेशादागच्छति, अत एतादृशे समये त्वया गृहे एव स्थातव्यम्, न तूपपतिरमणार्थं बहिः प्रयातव्यमिति विदग्धा सखी जनान्तरसन्निधौ अभिसारार्थं प्रयान्तीं स्वसखीं चातुर्येण ध्वनयति। व्यंग्योयमर्थः प्रकरणरूपप्रस्ताववैशिष्ट्यादेव सचेतसां मनस्सु विद्योतते। उपनायकं रन्तुमभिलषन्ती नायिका सुरतसुखावहवेशविन्यासादिनात्मानमलंकृत्याभिसारार्थं समुद्यतेति व्यंग्योऽर्थः प्रकरणज्ञानवतां सहृदयानामेव प्रतीतिविषयः। अतः प्रकरणरूपप्रस्तावैशिष्ट्याद् व्यंग्यार्थावगतौ प्रकरणरूपप्रस्तावविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना।[1]

## (8) देशविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना

स्थानवैशिष्ट्येन व्यङ्ग्यार्थपरिस्फुरणे देशविशिष्टा वाच्यसम्भवा आथी व्यञ्जना। वर्णनीयस्थानवैशिष्ट्यमत्र व्यङ्ग्यार्थोल्लासे निबन्धनम्। तद्यथा-

**अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः।**
**नाहं हि दूरं भ्रमितुं समर्था प्रसीदतायं रचितोऽञ्जलिर्वः।।**[2]

अत्र विदग्धया प्रियसख्या कौशलेन विविक्तप्रदेशे समानीतमुपनायकं दृष्ट्वा काचित् सम्भोगसुखार्थिनी रमणी कुसुमावचयार्थमुद्याने समागताः स्ववयस्यास्त स्मात्स्थानादन्यत्र गन्तुमादिशिति, 'अन्यत्र यूयं कुसुमावचायमि' त्यादिना। नायिकायाः प्रियसखी मन्मथवेदनाविदीर्यमाणहृदयेयं नायिकाऽवश्यमेवास्या हृदयवल्लभेन संयोज्येति विचार्य तत्कामुकं वेषविपर्ययं कारयित्वा महिलाजनसञ्चरणयोग्ये तस्मिन्नुपवने आनयति। अत एव निर्विध्नसुरतसुखोपभोगार्थं विविक्तं देशमीहमाना नायिका, कुसुमावचायपराः स्वसखीः विदग्धतया सम्बोधयति 'अन्यत्र यूयमि'त्यादिना। अयमभिप्रायः। हे सख्यः, यूयमितो दूरं गत्वा कुसुमान्यवचितुथ। अहं दूरं गन्तुमशक्ता। अतो हस्तग्राह्यकुसुमेऽस्मिन् निर्जने प्रदेशे एकाकिन्येवाहं प्रसूनचयनं करोमि। वाच्यार्थदस्मादतिविविक्ततादिरूपदेशवैशिष्ट्यात् प्रच्छन्नकामुक उपभोगार्थमत्र प्रहेय इत्यर्थो ध्वनितो भवति।

---

[1] अत्र प्रकरणस्य प्रस्तावस्याभिसारसम्बन्धित्वरूपवैशिष्ट्यादुपपत्ति प्रत्यभिसर्तुं न योग्यमिति व्यज्यते। -पण्डित दुर्गाप्रसाद, गोविन्दकृत काव्यप्रदीप, पृ 53।

[2] काव्यप्रकाश, पृ 78।

### (9) कालविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना

यत्र कालज्ञानेन व्यंग्यार्थः परिस्फुरति, तत्र कालरूपोपाधिवैशिष्ट्यात् ध्वनौ सति कालविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना। तद्यथा-

**गुरुजनपरवश प्रिय किं भणामि तव मन्दभागिनी अहकम्।**
**अद्य प्रवासं व्रजसि व्रज स्वयमेव श्रोष्यसि करणीयम्।।**[1]

प्रवसिष्यन्तं नायकं प्रति सन्नायिकाया उक्तिरियम्। अत्रैतादृशे मधुमासे यदा विरहिणीनां कामिनीनां हृदयवल्लभा अपि स्वगृहानायान्ति, तदा त्वं विदेशगमनैकमना असीति न शोभनम्। विरहिजनहृदयविदारकेऽस्मिन् मधुमासे उपस्थिते मद्विधानां हतभाग्यानां नारीणां प्रियतमवियोगे सति मरणमन्तरेण नान्या गतिः। अतो मम जीवनेनास्ति यदि किञ्चित् प्रयोजनम्, अस्मि च तव हृदयवल्लभाऽहम् तदा त्वया मधुमासेऽस्मिन्नत्रैव स्थातव्यमिति व्यंग्योर्थो मधुमासकालमहिम्नैव परिस्फुरति। यदि नायकस्य प्रवासगमनमन्यस्मिन् काले भवेत्तदा नेदृशस्यार्थस्य ध्वनिः व्यंग्योऽयमर्थो मधुमासकालवैशिष्ट्यादेव ध्वनितो भवति, अतोऽत्र कालविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना।

### (10) चेष्टाविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना

प्रस्तावदेशकालादेः इति मम्मटभट्टाकारिकायामादिपदग्रहणाच्चेष्टादीनां वैशिष्ट्यादपि व्यंग्यार्थोल्लासः सम्भवः। एवं चेष्टाविशेषेण वाच्यार्थव्यञ्जकतायां चेष्टाविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना। तद्यथा-

**द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया**
**प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितम्।**
**आनीतं पुरतः शिरोंऽशुकमधः क्षिप्ते चले लोचने**
**वाचस्तत्र निवारितं प्रसरणं सङ्कोचिते दोर्लते।।**[2]

---
[1] काव्यप्रकाश, पृ 76।
[2] काव्यप्रकाश, पृ 79।

अत्रोपपर्ति गुरुजनसविधे पश्यन्ती काचिद्विदग्धा नायिका किञ्चिद्वक्तुमशक्नुवती विपरीतसुरतप्रदानस्पृष्टकालिङ्गनादिभि: सूर्यास्तसमयानन्तरं कोलाहलरहिते काले त्वां प्रसादयिष्यामीत्यूरुसमासङ्गलोचनाध:क्षेपादिभिश्चेष्टाभिरुपपतिं प्रति स्वाकूतं ध्वनयति। एदं लोचनचालनांशुकाध:प्रक्षपणादिभिश्चेष्टाभि: विपरीतरतिप्रदानाद्यर्थध्वननात् चेष्टारूपोपाधिविशिष्टा वाच्यसम्भवा आर्थी व्यञ्जना।

अत्रेदं बोध्यम्। व्यञ्जकता न केवलं वक्तृबोद्धव्यात्रुपाधिषु पूर्वगणितेष्वेव विभाव्या, परमशाब्द्याश्चेष्टाया अपि वैशिष्ट्येन व्यञ्जकतायामुपपन्नायां व्यञ्जनयाऽनया सर्वं विश्वमेव व्याप्तम्। वक्तृबोद्धव्याद्युपाधिपरिगणनया तु दिङ्मात्रमुन्मीलितम्। वस्तुतस्तु व्यञ्जनानन्ता। वक्तृबोद्धव्यादीनामुपाधीनां पृथक् पृथग्वञ्जकत्वे वाच्यार्थसम्भवा व्यञ्जनैवात्र निर्दिष्टा। परं वक्तृबोद्धव्याद्युपाधीनां सम्मिलितानामपि वैशिष्ट्याद् वाच्यार्थस्य व्यञ्जकता सम्भवति। तद्यथा-

**कालो मधु: कुपित एष च पुष्पधन्वा**
**धीरा वहन्ति रतिखेदहरा: समीरा:।**
**केलीवनीयमपि वञ्जुलकुञ्जमञ्जु**
**दूरे पति: कथय किं करणीयमद्य।।**[1]

अत्र वक्तृवाक्यप्रस्तावदेशकालानां मिलातानां व्यञ्जकत्वं दृश्यते। तथाहि एतं देशं प्रति शीघ्रं प्रच्छन्नकामुकस्त्वया प्रहेय: इति व्यङ्ग्योऽर्थोऽत्र पूर्वोक्तानामुपाधीनां वैशिष्ट्यवशात् परिस्फुरति। चौर्यरताभिलाषिणी काचित् स्वैरिणी प्रस्तुते पद्ये वक्त्री। अतो वक्तृवैशिष्ट्यं स्फुटम्। 'एष:' 'इयम' 'अपि' इत्यादीनि पदान्यप्यत्र व्यंग्यार्थावगतौ सहायकान्यत: वाक्यवैशिष्ट्यम्। मधुवञ्जुलकुञ्जादीनां वर्णनं कालदेशयोरपि वैशिष्ट्यम् विभाव्यते। अतोऽत्र वक्तृदेशकालादीनां पञ्चानामुपाधीनां वैशिष्ट्येन प्रच्छन्नकामुकोत्र प्रहेय: इति व्यंग्यार्थध्वनननाम्निलितोपाधिविशिष्टा वाच्य-सम्भवा आर्थी व्यञ्जना।

## (ख) लक्ष्यार्थसम्भवा आर्थी व्यञ्जना

---

[1] शास्त्री, शालग्राम, विश्वनाथ-कविराजकृत साहित्यदर्पण, पृ 43।

यत्र लक्ष्योऽर्थो व्यञ्जकस्तत्र लक्ष्यार्थसम्भवा आर्थी व्यञ्जना। अयमाशय:। लक्ष्यार्थसम्भवायामार्थ्यां व्यञ्जनायां प्रथममभिधया वाच्यार्थप्रतीतिरनन्तरं मुख्येऽर्थेनुपपन्ने सति लक्षणया लक्ष्यार्थस्यावगति:। लक्ष्यार्थस्य व्यञ्जकतायां लक्ष्यार्थसम्भवा आर्थी व्यञ्जना। वाच्यार्थसम्भवायामार्थ्यां व्यञ्जनायां वाच्योऽर्थो व्यञ्जकोऽत्र तु लक्ष्योऽर्थ इति द्वयोर्भेद:।

ननु लक्ष्यार्थसम्भवाऽऽर्थी व्यञ्जना लक्षणामूलायां शाब्द्यां व्यञ्जनायामन्तर्भवतीत्यार्थीति तद्व्यपदेशोऽनुपपन्न इति चेन्न, लक्ष्याथदिव व्यंग्यार्थावगतेर्नतु लक्षकाच्छब्दात्। अयमाशय:। लक्षणामूलायां शाब्द्यां व्यञ्जनायां लक्षक: शब्दो व्यञ्जक:। तत्र व्यञ्जना प्रयोजनरूपिणं व्यंग्यमर्थं लक्षणा सहकारितया लक्षकशब्दबलाद् ध्वनयतीति लक्षणामूला व्यञ्जना शाब्दी। परं यत्र लक्ष्यार्थसम्भवा व्यञ्जना, तत्र प्रयोजनरूपोऽर्थो न लक्ष्यार्थसम्भवाया व्यञ्जनाया विषय: असौ तु लक्षणामूलाया: शाब्द्या व्यञ्जनाया एव विषय:। परं प्रयोजनरूपव्यंग्येन सहापरस्य व्यंग्यार्थस्य प्रतीतिर्लक्ष्यार्थाद् भवतीत्यसौ व्यंग्यार्थो लक्ष्यार्थसम्भवाया व्यञ्जनाया विषय:। अतो यया व्यञ्जनाया प्रयोजनरूपार्थप्रतीतिरसौ लक्षणामूला शाब्दी व्यञ्जना। यया च प्रयोजनातिरिक्तस्यार्थस्य व्यंग्यस्य लक्ष्यार्थात् व्यञ्जकाद् ध्वननं सा लक्ष्यार्थसम्भवा आर्थी व्यंजना। एवमुभयोर्विविक्तविषयत्वाद् भेद: स्पष्ट:। लक्षणामलायां शाब्द्यां व्यञ्जनायां प्राधान्येन शब्द एव व्यञ्जक:। 'गंगायां घोष:' इत्यत्र गंगातटे इति पदपरिवर्तनेन न व्यंग्यार्थप्रतीतिरतस्तत्र शब्दस्य प्राधान्येन व्यञ्जकता। परं लक्ष्यार्थसम्भवायामार्थ्यां व्यञ्जनायां व्यंग्योऽर्थो लक्षकाच्छब्दान्नाभिव्यक्तो भवति, प्रत्युत लक्ष्यार्थात् अतोऽस्या आर्थीत्यभिधानं लक्ष्यार्थसम्भवेति नामकरणमुभयप्युपपन्नम्। इत्थं लक्ष्यार्थात् व्यंग्यार्थस्य ध्वनने लक्ष्यार्थसम्भवा आर्थी व्यञ्जना। तद्यथा-

**साधयन्ती सखी सुभगं क्षणे क्षणे दूनासि मत्कृते।**
**सद्भावस्नेहकरणीयसदृशकं तावद्विरचितं त्वया।।**[1]

अत्र काचिद्विप्रलब्धा नायिका निजसख्यवयवेषु क्षामतादिलक्षणानि निरीक्ष्य मम प्रियोनया उपभुक्त इत्यनुमिनोति। परतश्च साधयन्तीत्यादिना श्लोकेन तां भर्त्सयति। अत्रापराधिन्या: सख्या विषये प्रयुक्तं सद्भावस्नेहकरणीयसदृशकमितिवचनमनुपपन्नमत एव

[1] काव्यप्रकाश, पृ 29।

तात्पर्यानुपपत्तेर्मुख्यार्थबाधः। तेन च लक्षणायाः प्रयोजनभूतं शत्रुत्वातिशयरूपं व्यंग्यं परिस्फुरति। अनन्तरं लक्ष्यार्थान्नायकोतीव धूर्तोऽविश्वसनीयस्तादृशी च त्वमित्यपरो व्यंग्योर्थोपि समुन्मिषति। असावर्थो न लक्षणायाः प्रयोजनभूतः। परं प्रयोजनरूपार्थानन्तरं प्रतीयमानः कामुकदूतीविषयकापराधरूपोऽर्थो लक्ष्यार्थाद्व्यज्यतेऽतोऽत्र लक्ष्यार्थसम्भवा आर्थी व्यञ्जना।

वाच्यार्थसम्भवायामार्थ्यां व्यञ्जनायां तृतीयस्यां कोट्यां व्यंग्यार्थस्यावगतिः। लक्ष्यार्थसम्भवायामार्थ्यां व्यञ्जनायां तु चतुर्थ्यां कोट्यां व्यंग्यार्थावगतिः सम्पद्यते। वाच्यार्थसम्भवायां व्यञ्जनायामाद्यायां कोट्यां संकेतितार्थप्रतीतिः, द्वितीयस्या कोट्यमाकाङ्क्षासत्तियोग्यतावशात् संकेतितार्थानां परस्परमन्वितरूपेणावस्थानम्। तृतीयस्यां कोट्यां व्यंग्यार्थस्य व्यक्तिः।

परं लक्ष्यार्थसम्भवायामार्थ्यां व्यञ्जनायां चतुर्थ्यां कोट्यां घण्टानिह्रादस्थानीयस्य व्यंग्यार्थस्य ध्वननम्। तत्र मुख्यार्थप्रतीतिरिति प्रथमा कोटिः। तेषामनन्वितानामर्थानाम् परस्परं संसर्ग इति द्वितीया कोटिः। तात्पर्यानुपपत्या मुख्यार्थसम्बद्धलक्ष्यार्थावगतिरिति तृतीया कोटिः। पुनश्चतुर्थ्या कोट्या व्यंग्यार्थप्रतीतिरिति लक्ष्यार्थसम्भवायामार्थ्यां व्यञ्जनायां व्यंग्योऽर्थस्तुरीयकोटिसमारूढः रसिकानां प्रतीतिपदवीमध्यारोहति।

यथा वक्तृबोद्धव्याद्युपाधिवैशिष्ट्याद् वाच्यार्थस्य व्यञ्जकता पुरा प्रोक्ता तथैव लक्ष्यार्थस्यापि व्यञ्जकता सम्भवा। यथा च वाच्यार्थसम्भवायां व्यञ्जनायां व्यस्तानां समस्तानां चोपाधीनां व्यञ्जकता सम्भवति, तथैव लक्ष्यार्थसम्भवाया व्यञ्जनाया अपि वक्तृबोद्धव्याद्युपाधिद्विकत्रिकादियोगे भेदा संभवन्ति। लक्ष्यार्थसम्भवाया व्यञ्जनायाः पूर्वोक्तोपाधिवैशिष्ट्याद् वाच्यार्थसम्भवव्यञ्जनवदुदाहरणानि सौकर्येण नोपलभ्यन्ते, अतो दिङ्मात्रं प्रदर्श्यात्र विरम्यते।

वक्तृवैशिष्ट्यादुपचरितार्थस्य व्यञ्जकतायां वक्तृविशिष्टा लक्ष्यार्थसम्भवा आर्थी व्यञ्जना। तद्यथा-

**दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद् गृहे दास्यसि**

**प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति।**
**एकाकिन्यपि यामि तद्वरमितः स्रोतस्तमालाकुलं**
**नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः।।**[1]

अत्र काचित् स्वैरिणी जलानयनव्याजेन गृहाद् बहिर्गत्वारण्ये उपपतिना सह रन्तुमीहते। स्वैरिण्याः पत्यर्थं सरसो जलानयनार्थं गमिष्यामीति वचनं तात्पर्यानुपपत्तिवशादनुपपन्नम्। नहि तत्वतः पतिभक्त्येयं पुंश्चली दूरदेशात् जलमानेतुं यतते, प्रत्युत तद्व्यपदेशेनासौ उपपतिना सह रन्तुं कामयते। अतस्तत्वतः पत्यर्थं सरसो जलानयन नात्रेष्टमिति वक्त्र्यास्तात्पर्यानुपपत्तेर्मुख्यार्थबाधाद् वैपरीत्यसम्बन्धेन परपुरुषसमीपगमनं लक्ष्यते। अनन्तरं वक्त्र्या स्वैरिण्या वैशिष्ट्यात् परपुरुषोपभोगार्थं गच्छन्तीयं नीरन्घ्रनलग्रन्थिघर्षणव्याजेन सम्भाव्यमानानि रतोपमर्द्दजनितखक्षतादिचिह्नानि निह्नुते इति व्यंग्योर्थं परपुरुषसमीपगमनरूपलक्ष्यार्थादुदेति। अत्र वक्त्र्या वैशिष्ट्य व्यंग्यार्थविगतौ निबन्धनमतो लक्ष्यार्थसम्भवा वक्तृविशिष्टा आर्थी व्यञ्जना।

एवमेव 'साधयन्ती सखी' इति पूर्वोक्ते पद्ये कामुकविषयसापराधत्वं व्यंग्यर्थं बोद्धव्याया दूत्या वैशिष्ट्यात् परिस्फुरति। यदि बोद्धव्या दूती सद्भावपरा तदा न व्यंग्यार्थोल्लासः। तस्या निस्नेहत्वासद्भावपरत्वादिबोधे एव व्यंग्यार्थप्रतीतिः। अतोऽत्र बोद्धव्यविशिष्टा लक्ष्यार्थसम्भवा आर्थी व्यञ्जना। एवं काकुप्रकरणादिवैशिष्ट्यादपि लक्ष्यार्थव्यञ्जकता विद्वद्भिः स्वयमेवोह्या।

### (ग) व्यङ्ग्यार्थसम्भवा आर्थी व्यञ्जना

यत्र व्यंग्याथोऽर्थो व्यञ्जकस्तत्र व्यङ्ग्यार्थोज्जीविता व्यञ्जना व्यंग्यार्थसम्भवेति व्यपदिश्यते। व्यङ्ग्यार्थसम्भवायां व्यञ्जनायां प्रथमं वाच्योऽर्थः अनन्तरं व्यञ्जनया व्यङ्ग्याथोऽवबुध्यते। पिनुर्व्यङ्ग्यार्थदस्मात् व्यञ्जनया अपरो व्यंग्योऽर्थो ध्वनितो भवति। अतएवेयं द्वितीया व्यञ्जनया व्यंग्यार्थसम्भवेत्युच्यते। तद्यथा–

**पश्य निश्चलनिष्पन्दा बिसतीपत्रे राजते बलाका।**
**निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव।।**[1]

---

[1] शास्त्री, शालग्राम, श्रीविश्वनाथकविराजकृत साहित्यदर्पण, पृ 135।

अत्र चौर्यरतसुखरसिकया कयाचित् 'निश्चलनिष्पदा' इत्यादिना जनरहितत्वमिति सूच्यते। व्यंग्यार्थादस्यात् संङ्केतस्थानमिदमतोऽत्र जनरहितत्वान्निष्कण्टकः सुरतसुखास्वादो भविष्यतीत्यपरो व्यंग्योऽर्थोऽभिव्यक्तो भवति। अत्र 'निश्चलनिष्पन्दा' इत्यादीनां पदानां निश्चलेत्यादिसंकेतितोऽर्थः प्रथमः। तदनन्तरं वाच्यार्थादस्मात् कमलिनीपत्रे बलाकाया निश्चलभावेनावस्थान्निर्जनत्वमिति व्यंग्यार्थप्रतीतिः। ततश्च विस्रब्धः सम्भोग इत्यन्त्यायां कोट्यां व्यंग्यार्थात् व्यंग्यार्थस्य प्रतीतिरिति व्यंग्यार्थसम्भवा आर्थी व्यञ्जना।

अस्मिन् प्रसंग एतत्स्मरणीयमास्ते यदेतासु विवेचितासु व्यञ्जनासु वक्तृबोद्धव्यादीनामुपाधीनां वैशिष्ट्यादेव व्यंग्यार्थस्य ध्वननम्। अतो व्यङ्ग्यार्थसम्भवाया व्यञ्जनाया अपि वाच्यार्थलक्ष्यार्थसम्भवव्यञ्जनादिशा उपाधीनां भेदाद् बहवो भेदा भवन्ति। ते भेदा उदाहरणानां सौकर्येणादर्शनानत्र प्रस्तूयन्ते। केवलं दिङ्मात्रमेवोन्मील्यते।

तत्र वक्तृवैशिष्ट्याद् व्यङ्ग्यार्थस्य व्यञ्जकता, यथा-

**भ्रम धार्मिक विश्रब्धः स शुनकोऽद्य।**
**गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन।।**[2]

अत्रादौ व्यञ्जनया गोदावरीतीरे सिंहसद्भावाद् धार्मिकस्य भ्रमणानिषेधो व्यज्यते। ततश्च भ्रमणनिषेधरूपव्यङ्ग्यार्थात् निर्विघ्नसुरतव्यापारास्वादो भविष्यतीति विदग्धया कयाचित् पार्श्वस्थमुपपतिं प्रति ध्वन्यते। अत्र वक्त्र्या पुंश्चल्या वैशिष्ट्याद् व्यङ्ग्यार्थस्य प्रतीतिर्भवति। यदि वक्त्री साध्वी, वर्हि वाच्यार्थस्यैव प्रतीतिः। किञ्च निर्विघ्नसुरतभोगरूपो व्यङ्ग्योऽर्थोऽन्यसन्निधिरूपोपाधिवैशिष्ट्यादपि ध्वनितो भवति। यद्युपपति समीपे न विद्यते, तदा भीरुधार्मिकभ्रमणनिषेधरूपो व्यंग्योर्थ एव प्रतीतः स्यात्। परमपरस्य व्यङ्ग्यार्थस्यानुभूतौ अन्यसन्निधेरपि वैशिष्ट्यम्। एवं व्यङ्ग्यार्थसम्भवाया व्यञ्जनाया काक्वाद्युपाधिवैशिष्ट्यादन्ये भेदाः स्वयमेवोह्याः।

**व्यङ्ग्यार्थवैचित्र्येण व्यञ्जनाभेदाः**

---

[1] काव्यप्रकाश., पृ 30।
[2] शास्त्री, पट्टाभिराम, आनन्दवर्धनकृत, ध्वन्यालोक, पृ 52।

व्यञ्जकार्थवैचित्र्येण आर्थ्या व्यञ्जनाया भेदाः प्रदर्शिताः। अधुना व्यङ्ग्यार्थवैचित्र्येण तस्याः पुनर्भेदाः निरूप्यन्ते। वक्तृबोद्धव्याद्युपाधीनां वैशिष्ट्येन आर्थी व्यञ्जना यं व्यङ्ग्यमर्थमभिव्यनक्ति, असावर्थस्त्रिविधः। वस्तुरूपोलंकाररूपो रसरूपश्चेति। अतस्त्रिविधं व्यंग्यमर्थ बोधयन्ती व्यञ्जना व्यंग्यार्थधिया पुनस्त्रिधा विभज्यते। 1. वस्तुव्यङ्ग्या आर्थी व्यञ्जना। 2. अलंकारव्यंग्या आर्थी व्यञ्जना। 3. रसव्यङ्ग्या आर्थी व्यञ्जना।

## (क) वस्तुव्यङ्ग्या आर्थी व्यञ्जना

या व्यञ्जना वस्त्वात्मकं व्यङ्ग्यं बोधयत्यसौ वस्तुव्यव्यङ्ग्या व्यञ्जना।

तद्यथा-

**अलसशिरोमणिधूर्तानामग्रिमः पुत्रि धनसमृद्धिमयः।**

**इति भणितेन नताङ्गी प्रफुल्लविलोचना जाता।।**[1]

इत्यत्र काचिन् प्ररूढयौवना समासन्नविवाहा कुमारी सम्भावितस्य पत्युरलसधूर्तत्वादीन् गुणानाकर्ण्य प्रहृष्यतीति वाक्यार्थः। तेन चैवंविधगुणविशिष्टः पतिरस्या एवोपभोगयोग्यः सर्वथा परमसौभाग्यवती चासाविति व्यङ्ग्योऽर्थो वस्तुरूपो व्यक्तो भवति। अत्रालसत्वेन नायकस्य नायिकान्तरगृहगमनशङ्कानिरासः, धूर्तत्वेन तस्य सम्भोगव्यग्रता, धनसमृद्धिमयेत्यादिना च सर्वथैश्वर्यसम्पन्नत्वञ्च पत्युर्ध्वनितं भवति। अत एवंविधगुणानां रमणीजनवल्लभानां सद्भावात् परमसौभाग्यशालित्वं कुमार्या व्यक्तं भवति। तच्च लोचनविकासादिभिश्चेष्टाभिरनया सूच्यते। अतो ममैवोपभोगयोग्योऽयमिति स्तुरूपिणोऽर्थस्य परिस्फुरणाद् वस्तुव्यङ्ग्येयमार्थी व्यञ्जना।

## (ख) अलङ्कारव्यङ्ग्या आर्थी व्यञ्जना

या व्यञ्जना अलङ्काररूपिणं व्यङ्ग्यमर्थं द्योतयत्यसौ अलङ्कारव्यंग्या व्यञ्जना। तद्यथा-

**यः कालागुरुपत्रभङ्गरचनावासैकसारायते**

**गौराङ्गीकुचकुम्भभूरिसुभगाभोगे सुधाधामनि।**

---

[1] काव्यप्रकाश, पृ 135।

**विच्छेदानलदीपितोत्कवनिताचेतोधिवासोद्भवं**
**सन्तापं विनीनीषुरेष विततैरङ्गैर्नताङ्गि स्मरः ।।**[1]

इत्यत्रापह्नतिसन्देहप्रतिवस्तूपमाहेत्वादीनामलङ्काराणां ध्वननादुत्तममुदाहरणामलङ्कारव्यङ्ग्याया व्यञ्जनायाः। तद्यथा- कोऽपि नायकः स्वप्रियासम्मुखे कामिजनमन्मथोज्जृम्भकं चन्द्रमण्डलमध्यवर्तिनं कलङ्कं वर्णयति। अत्र नायं वियोगग्निव्याकुलयेत्कण्ठित रमरणीहृदयसंतापहरश्चन्द्रकलङ्कः किन्तु तथाविधोमन्मथ इत्यपह्नवध्वननादपह्नुत्यलङ्कारस्य व्यङ्ग्यत्वम्। नात्रापहत्रवरूपोऽर्थेऽभिहितः परन्तु **नताङ्गि एष स्मरः** इत्यादिना प्रकृतं चन्द्रकलङकमपह्नुत्याप्रकृतस्मरस्थापनादपह्नुत्यलङ कारो व्यङगयः। किञ्च चन्द्रवर्तिनसतस्यकलङ्कस्यात्र न नामतो ग्रहणम्। अपितु गौराङ्गीकुचकुम्भसदृशे चन्द्रमसि कालागुरुपत्रभङ्गवच्छोभाधायकोऽयं कलंकोऽन्यद्वा किञ्चिद् वस्त्विति सन्देहध्वननात् सन्देहालंकारो व्यङ्ग्यः। प्रतिवस्तूपमाध्वनिरप्यत्र दृश्यते। काचिन्नायिका गृहायात् नायकमनंगीकृत्य पश्चात्तापमनुभवति। तत्सखी च नायिकासंतापद्रवितहृदया कथञ्चिन्नायकं तत्समीपमानयति। नायकोऽयं प्रस्तुतश्लोकेन चन्द्रमसोऽकं वर्णनम् चाटुकमारभते यन्नायिकाकुकुम्भाभूषितकालागुरुपत्ररचना मन्मथमुद्दीपयति। चन्द्रवर्तिनी कुवलयदलश्यामलकलकान्तिरप्येवमेव करोतीति मन्मथोद्दीपनरूपसाधारणधर्मस्योपमेयवाक्ये उपमानवाक्ये च शब्दभेदेनोपादानात् प्रतिवस्तुपमालंकारो व्यंग्यः। सन्तापं विनिनीषुरित्यत्र सन्तापहरणरूपकार्यस्य सुधाधामनीत्यादिहेतोर्ध्वननाद्धेत्वलंकारध्वनिरपि। सुधाधामनीति पदं हेतुतां नाभिदधाति, प्रत्युत तामभिव्यनक्तीति हेत्वलंकारस्यापि व्यंग्यत्वमत्र द्रष्टव्यम्। नायिकाकुचसदृशश्चन्द्रश्चन्द्रसदृशश्च नायिकाकुचकुम्भ इत्यर्थध्वननादुपमेयोपमाध्वनिरपि।[2] एवमपह्नुतिसन्देहाद्यलंकाराणां व्यङ्ग्यत्वेऽलङ्कारव्यङ्ग्या आर्थी व्यञ्जना।

नन्वलङ्कारस्य व्यङ्ग्यत्वे तस्यालङ्कार्यत्वमुपपन्नं न त्वलंकारता अन्यानलंकारणात्। अतोऽलंकारध्वनिरिति व्यपदेशो न यौक्तिकः। तथाहि- कटककुण्डलादीनां लौकिकानामलंकाराणां यथा रमणीनामलंकरणादलंकारता तथा वाच्यवाचकधर्माणामनुप्रासोपमाद्यलंकाराणामपि ध्वन्यमानार्थस्योपस्कारकरणादलंकार

---

[1] शास्त्री, पण्डितपट्टाभिराम, आनन्दवर्धनकृतो ध्वन्यालोक, लोचनभाष्यम्, पृ 275।
[2] लोचनभाष्यम्, पृ 276।

इत्यभिधानमन्वर्थकम्। परमलंकारध्वनावुपमोत्प्रेक्षादयो ध्वन्यमाना अलंकारा नाङ्गिनं कञ्चिदलङ्कुर्वन्ति, परं स्वयमङ्गित्वेनावतिष्ठमाना भूष्यन्ते। अत उपमारूपकादीनामलंकाराणां ध्वनने सति तेषामलंकारनाम्ना भिधानकरणं सर्वथाऽनुपपन्नम्। नह्यलंकारध्वनौ ध्वन्यमाना अलंकारा: कञ्चिदलंकुर्वन्ति, येनालंकारता तेषामुपपद्येत। प्रत्युत उपस्कार्या: सन्तो ध्वनित्वेन मूर्धाभिषिक्तास्तेऽलंकार्यत्वेन व्यपदेष्टव्या: नत्वलंकारत्वेनेति चेन्न। ब्राह्मणश्रमणन्यायेन अलंकार्यस्याप्यलंकारत्वव्यपदेशसम्भवात्। तथाहि- आदौ ब्राह्मणस्य पश्चाच्छ्रमणभावमापन्नस्य त्यक्तशिखासूत्रस्य अब्राह्मणस्यापि श्रमणस्य यथा पूर्वसंस्कारवशाद् ब्राह्मणत्वेनैव व्यपदेश:, तद्वदत्रापि प्रणिभालनीयम्।[1]

परं पण्डितराजजगन्नाथेन पूर्वोक्तं न्यायं विदूष्य मञ्जूषागतकटकन्यायेन व्यङ्ग्यस्यालंकारस्यालंकारध्वनिरित्यभिधानं समर्थितम्।[2] अयमाशय: पण्डितराजजगन्नाथस्य। यथा श्रमणस्य ब्राह्मणभाव: पूर्वं दृष्ट: श्रुतो वा भवति, तेन चाब्राह्मणस्यापि श्रमणस्य ब्राह्मणव्यपदेश: प्रसिद्धिं याति, न तथा ध्वन्यमानोऽलंकार: पूर्वं कदाचिदलंकारत्वेन ज्ञातो भवति येनाधुना अलंकारध्वनिरित्यभिधानमौचित्यं विभृयात्। अलंकारध्वनने सति, अलंकार्यत्वात्तस्यालंकारत्वं व्याहतम्भवति। पूर्वम् अलब्धसत्ताकोऽलकारध्वनिलंकार्यत्वेनैव स्वरूपलाभं प्राप्नोति। अतस्तस्यालंकाररूपेणैव न पूर्वं व्यवहारो येन ब्राह्मणश्रमणन्यायमवलम्ब्य तस्यालंकारध्वनिरिति व्यपदेशो यौक्तिक: स्यात्। अतो यौक्तिक्या बुद्ध्या निष्पीड्यमानोऽयं न्यायो नोपमर्दं क्षमते। प्रत्युत मञ्जूषागतकटकन्यायेनालंकारध्वनिरिति व्यपदेश: युक्त:। यथा मञ्जूषागतारमणीभिरवयवेष्वनवधृता अपि कटककुण्डलादयोऽलंकारा:, अन्यानलंकरणादप्यलंकारा एवाभिधीयन्ते, तथैव व्यङ्ग्यकोटिमारूढोऽलंकारोऽपि मञ्जूशागतकटककुण्डलादिलौकिकालंकारवदनलङ्कुर्वाणोऽपि अलंकारध्वनिरिति संज्ञप्यते।

## (ग) रसव्यङ्ग्या आर्थी व्यञ्जना

रसरूपिणं व्यङ्यार्थं द्योतयन्ती व्यञ्जना रसव्यङ्ग्येत्युच्यते। तद्यथा-

**शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै**

---

[1] य पूर्वं क्वापि वाच्यार्थेऽलङ्कारभावमुपमादिरूपतयान्वभूत्, इदानीं त्वनलङ्काररू एवान्यत्रगुणीभावाभावात्, स पूर्वं प्रत्यभिज्ञानबलादलङ्कारध्वनिरिति व्यपदिश्यते ब्राह्मणश्रमणन्यायेन।-ध्वन्यालोकलोचनम्, पृ 51।

[2] अस्याप्यालङ्कारव्यपदेश कदाप्यलङ्कारभावमप्राप्तेषु मञ्जूषादिगतेषु कटकादिष्विवालङ्कुर्वाणगतधर्ममात्रस्पर्श निबन्धन.। झा, पण्डितबद्रीनाथ. पण्डितराजजगन्नाथविरचित, रसगङ्गाधर, पृ 305।

**निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।**
**विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं**
**लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता।।**[1]

अत्र विभावानुभावादीनां समुचितयोजनया व्यञ्जनामहिम्ना सम्भोगश्रृंगाररसस्याभिव्यक्तिः। तद्यथा- नायिका आश्रयभूता। नायकोऽत्रालम्बनम्। गृहस्य शून्यत्वं पर्त्युर्मुखादिकञ्चोद्दीपनम्। चुम्बनादिकञ्चानुभावः। लज्जाहासादयश्च व्यभिचारिभावाः कल्लोलवदुन्मिषन्तो निमिषन्तश्च। यथा शर्करापयोवलङ्गादीना सामग्रीणां सम्मेलनेन निर्वर्तितः पानकरस आस्वादमुपयाति, तथैव विभावानुभावसंबलनया चमत्कृतिमादधानस्तन्मयीभवनयोग्यता ग्राह्यो व्यङ्ग्यः सम्भोगश्रृंगारो विदग्धानामास्वादविषयतामुपयाति। एवं व्यङ्ग्यं रसं बोधयन्ती वृत्तिव्यञ्जना रसव्यङ्ग्येत्युच्युते।

व्यङ्ग्यस्य रसस्य बहुविधत्वात्, वस्त्वलङ्कारध्वन्योरपि। स्वतः सम्भविकविप्रौढोक्तिसिद्धेत्यादिना नानात्वाद् ध्वनेर्भेदा बहुविधाः। व्यङ्ग्यार्थस्य च व्यञ्जनाव्यापारवेद्यत्वात् व्यङ्ग्यार्थनानात्वे तत्प्रत्याकयस्य व्यापारस्यापि ध्वनिवद् बहवो भेदा भवन्ति। परमत्र प्रधानभेदा एव प्रदर्शिताः।

वस्तुतस्तु अशब्दात्मकनेत्रत्रिभागावलोकनादीनामपि व्यञ्जकतायामनवधिव्यञ्जकता। तेन व्यङ्ग्यार्थद्योतनपरस्य व्यापारस्याप्यनन्तता।

**शाब्धार्थीव्यञ्जनयोर्भेदः:**

यद्यपि शाब्द्यां व्यञ्जनायामर्थस्य आर्थ्यां व्यञ्जनायाञ्च शब्दस्य सहकारिता नितान्तमपेक्ष्यते, तथापि शाब्द्यां व्यञ्जनायां शब्दस्य प्राधान्येन व्यञ्जकतायां शाब्दी, आर्थ्यां व्यञ्जनायां चार्थस्य प्राधान्येन व्यञ्जकतायाम् आर्थीति व्यपदेशः प्रतिष्ठां प्राप्तः। प्राधान्येन व्यपदेशा भवन्तीति न्यायात्। एवं शब्दस्य प्राधान्ये व्यञ्जनायाः शाब्दीत्यर्थप्राधान्ये चार्थीतिनामकरणाच्छाब्द्यार्थीत्युभयविधविभागो युक्तियुक्तः। किञ्च शाब्द्यां व्यञ्जनायां शब्दः पर्यायान्तरेण परिवृत्यसहोतः शब्दस्य व्यञ्जकतायां शाब्दीति व्यपदेशः

[1] काव्यप्रकाश, पृ 101।

सार्थक: शब्दपरिवर्तनेन व्यङ्ग्यार्थस्याप्रतीते:। आर्थ्यां व्यञ्जनायां पर्यायान्तरेण शब्दस्य परिवृत्तिसहत्वादर्थस्य व्यञ्जकतायामार्थीति व्यपदेशो युक्तियुक्त:। परमुभयत्रैकस्य प्राधान्येऽपरस्याप्यपेक्षा। अन्यथा शाब्द्यां व्यञ्जनायामर्थस्यानपेक्षायामज्ञातार्थस्य शब्दस्यापि व्यञ्जकताप्रसंग:। आर्थ्यां व्यञ्जनायां च विशिष्टशब्दाभिधानाभावे तदभिधेयार्थस्य व्यञ्जकता न स्यात्। अत: शब्दार्थयोर्द्वयोरपेक्षा।[1]

**भ्रम धार्मिक विस्त्रब्ध स शुनकोऽद्य मारितस्तेन।**

**गेदावरीनदीकूललतागहनवासिना दृप्तसिंहेन।।**

अत्र आनन्र्धनाचायेणा निषेधरूपिणोर्थस्य व्यङ्ग्यत्वं समाख्यायि। तत्सर्व विविच्यमानमनुमानेऽन्तर्भवति त्रिरूपाल्लिङ्गाल्लिङ्गिज्ञानमनुमानमिति तल्लक्षणात्। अनुमिते: द्वे अङ्गे। पक्षधर्मता व्याप्तिश्च। पक्षसत्वविपक्षव्यावृत्तत्वेन अनुमिते: त्रिरूपाणिलिङ्गनि। अन्वयव्यतिरेकाभ्यां लिङगलिङिनोरविनाभव: सिध्यति। अनिनाभाव: एव व्याप्ति:। अन्वयव्यतिरेकात्मकसपक्षसत्वविक्षासत्पया अनया व्याप्त्या हेतो: शुद्धत्वं निश्चितं भवति। तेनचादुष्टेना नियतस्य साध्यस्य पक्षे सिद्धि:।

पूर्वोक्ते पद्ये यो भीरूभ्रमणाभावरूपोऽर्थ आन्नवर्धनाचार्येणा वस्तुध्वनिव्यपदेशेन प्रतिष्ठापितोऽसौ गोदातटे पक्षे दृप्तसिद्घावत्वेन उपात्तेन हेतुना साध्यो लिङगी सन्ननुमेय एव महिमभट्टमतेन।[2] अत्र पर पुरूषचौर्यरतिसुखलुब्धया कयाचिच्छुनो भीत: कश्चन धर्मिको विधिमुखेन भ्रमेत्यादिना निश्शङ्कं गोदातटे भ्रमणार्थमादिष्ट: यतो हि भीरूधर्मिकस्य भयप्रकम्पमानामङगलतिकां प्रकुर्वाण: श्वा गोदानदीतटवासिना छप्तसिंहेन पञ्चत्वं प्रापित:। अतो भयकारणास्य शुनोऽभावाद् धार्मिकस्य निष्कण्टकं वने भ्रमणां जातमिति सामान्येन रतिलम्पटाया: स्वैरिण्या: कस्याश्चिदुक्ति:। वस्तुतस्तु निरन्तंर

---

[1] यद्यपि शब्दशक्तिमूलकत्वमर्थशक्तिमूल कत्वञ्चेत्युभयमपि सकल व्यङ्ग्यसाधारणम् शब्दार्थयोरनुसन्धान विना व्यङ्ग्यस्यैवानुल्लासात्, तथापि परिवृत्यसहिष्णूना शब्दना प्राचुर्य तत्प्रयुक्तात् प्राधान्यात् सत्या अप्यर्थशक्तेरप्राधान्याच्च व्यङ्ग्यस्य शब्दशक्तिमूलकत्वेनैव व्यपदेश, परिवृत्यसहिष्णूना तु प्राचुर्येऽर्थशक्तेरेव प्राधान्यात् सत्या अपि शब्दशक्ति प्राधानानुगुण्यार्थतया मल्लग्रामादिवत प्रधानेनैव व्यपदेश.। झा, पण्डितबद्रीनाथ, पण्डितराजजगन्नाथविरचित रसगङ्गाधर, पृ 115।

[2] (क) तेनानुमेय एव भ्रमणस्य निषेधो न व्यङ्ग्य इत्यवसेय यथा नात्रशीतस्पर्शोऽग्नेरित्यत शीतस्पर्शस्य। -व्यक्तिविवेक:, पृ. 402

(ख) इत्थञ्च गम्यमानार्थस्पर्शमात्रमलङ्कृति।
वाच्यस्येत्येतदुक्त स्यान्मता सैवानुमा तत।। -व्यक्तिविवेक, पृ 143

धार्मिकेन पल्लवपुष्पावचयकाणात् प्रकाशतामुपगछत् गोदानदीतटस्थितं चौर्यरतस्थानं कुञ्जं धार्मिकविहणाविरहितं भवेदिति साध्यं पुंश्चल्या:। अत एव शुनो भीतो धार्मिको छप्मसिंहनामश्रवणादवश्यं तच्चैर्यरतसङ्केत स्थानात् सुगोप्यात् पराङ्मुखो भविष्यतीति विधिमुखेन असाध्व्या भीरूधीमिको गोदानदीतटकुञ्जभ्रमणान्निवार्यते।

एवमत्र आपन्न्दवर्धनोक्तस्य वस्तुध्वने: सुनिपुणं पर्यालोचने कियामाणे निषेधरूपिणो ध्वन्यमानरूयार्थस्य अनुमेयत्वमेवोपपन्नं भवति नतु व्यङ्चत्वम्। तथाहि- इदमनुमानशरीरम्। यद् यद् भीरूभ्रमणं तत् तत् भयकारणानिवृत्युपलब्धिपूर्वकम्। गोदावरीतीरं च भयकारणासिहाधिष्ठितम् अतस्तत् श्वभीरूभ्रमणायोग्यम् इति। अत्र भ्रमणास्य यद् व्यापकं भयहेतुनिवृत्तिज्ञानं तद्विरूद्धा भयकारणासिहोपलब्धि: भ्रमणारूपं व्याप्तं निवारयति। अत्र गोदातीरं पक्ष:। छप्तसिहासद्भावो हेतु:। भ्रमणाभावस्तु साध्य:। तेन च अनुमिते: पञ्चावयवं वाक्यमत्र प्रस्तूयमानया दिशा विनियोज्यम्। अयं देशो भीरूभ्रमणायोग्यो छप्सिहसद्भाववत्वादित्यनुमानस्वरूपम्। तत्र-

1 अयं देश: भीरूभ्रमणायोग्य इति प्रतिज्ञावाक्यम्।

2 दृप्तसिंहसद्भाववत्त्वादिति हेतु:।

3 अरण्यमिति दृष्टान्त।[1]

4. तद्यथेति उपनय:।

5. तस्मात्तथेति निगमनम्।

अनया दिशा अन्येष्वपि ध्वनिनिदर्शनेषु व्यङ्ग्यार्थस्यानुमेयत्वमूह्यम्।

किञ्च ध्वनिसिद्धान्ते प्रतीयमानार्थस्य प्रधानगौणभावस्तद्वशाच्च काव्यस्य ध्वनि-गुणीभूतव्यंग्य-व्यपदेशाभ्यामुत्तमकाव्य-मध्यमकाव्येतिरूपेण विभागकरणं ध्वनिकाव्यस्य च तन्निबन्धनं वैशिष्ट्यं सर्वथानुपपन्नं रस्यमानतासारैकप्राणस्य काव्यस्योत्तममध्यमविभागासं भवात्। नह्यखण्डास्वादरूपिणि काव्ये प्रधानगुणभावेन काचिदपोद्धारबुद्धि: कृता भवति।[2] य एव प्रतीयमानोऽर्थोऽनुमीयमान: प्रधान: सन् उत्तमे काव्ये चारुत्वाधायक: स एव गुणीभूत: सन् मध्यमे काव्येऽपि। नहि प्रतीयमानेऽर्थ

---

[1] (क) यत्र यत्र दृप्तसिहसद्भावस्तत्र तत्र भीरुभ्रमणायोग्यत्वम्।
व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते।
त्योरभावयोस्तस्माद् विपरीत प्रतीयते।। -श्लोकवार्तिकम्, अनुमानपरिच्छेद, 139-120
(ख) यर्थान्तराभिव्यक्तौवस्सामग्रीष्टा निबन्धनम्।
सैवानुमितिपक्षे नो गमकत्वेन सम्मता।। -व्यक्तिविवेक 3, 30-31

[2] न च तस्य विशेष सभवति, निरतिशयसुखास्वादलक्षणत्वात्तस्य। -व्यक्तिविवेक पृ 94

वाच्यादतिशायिनि सति काव्यानन्दस्य कश्चिदुत्कर्षः तस्मिंश्च वाच्यार्थदप्रधाने सति कश्चिदपकर्षः। ध्वनिकारेण स्वयं प्रतीयमानार्थवशात् काव्यस्य सौभाग्यं स्वीकृतम्।[1] तथा सति काव्ये चारुत्वाधायकः प्रतीयमानोऽर्थ उत्तमकाव्यमध्यमकाव्ययोः समानभावेन व्याप्तः। तेन यत्रं यत्र प्रतीयमानार्थप्राधान्याप्राधान्येन कश्चित् विवके: कर्त्तव्यो भवति। चारुत्वं हि काव्यव्यपदेशभाक्, तच्च परमसौभाग्याधायकस्य प्रतीयमानार्थस्य सद्भावे सर्वस्मिन् काव्येस्ति प्रधानगौणभावमनपेक्ष्य। तद्यथा-

**व्रज ममैवैकस्या भवन्तु निःश्वासरोदितव्यानि।**
**मा तवापि तया विना दाक्षिण्यहतस्य जनिषत।।**[2]

अत्र वस्तुरूपिणः प्रतीयमानार्थस्य प्राधान्याद् ध्वनिवादिनोत्तमं काव्यं व्यपदिश्यते-

**लावण्यसिन्धुपरैव हि केयमत्र**
**यत्रोत्पलानि शशिना सह संप्लवन्ते।**
**उन्मज्जति द्विरदकुम्भतटी च यत्र**
**यत्रापरे कदलिकाण्डमृणालदण्डाः।।**[3]

इत्यत्र तस्यैव वस्तुरूपिणोऽर्थस्य अप्राधान्यात् गुणीभूतव्यङ्ग्यं मध्यमं काव्यं व्यपदिश्यते ध्वनिवादिभिः। वस्तुतः प्रतीयमानार्थसद्भावसौभाग्यवशात् द्वयोः पद्ययोस्तुल्यमेव हि चारुत्वम्। यदि लावण्यसिन्धुरित्यत्र प्रतीयमानार्थसद्भावो न स्यात्, तदा वाच्यार्थस्य प्राधान्येपि तत्र चारुत्वम् न स्यात्। एवं काव्य चारुत्वं सर्वथा प्रतीयमानार्थाश्रितम्। तद्यथा-

**उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।**
**तथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद् गलितं न लक्षितम्।।**[4]

---

[1] सर्वथा नास्त्येव हृदयहारिण. काव्यस्य स प्रकार, यत्र प्रतीयमानार्थसस्पर्शेन न सौभाग्यम्। -ध्वन्यालोक, पृ. 94
[2] व्यक्तिविवेक, पृ 137 (चौ स)
[3] व्यक्तिविवेक, पृ 137 (चौ स)
[4] तत्रैव, पृ. 11

इत्यत्र गुणीभूतव्यङ्ग्ये मध्यमेऽपि काव्ये यदि नायकनायिकारूपिण: प्रतीयमानार्थस्य प्रतीतिर्न भवेत्तदा वाच्यार्थस्यापि चारुत्वं कथं स्यात्। अतोऽत्रापि प्रतीयमानार्थेनैव रमणीयता। एवं प्रतीयमानोऽर्थ: प्रधानो वा भवेदप्रधानो वा काव्यस्य चारुत्वं तु तन्मूलमेवेति ध्वनिगुणीभूतव्यङ्ग्याभ्यां य: काव्यस्योत्तममध्यमविभाग: ध्वनिसिद्धान्ते, सोऽप्यनुपपन्नो महिमभट्टमतेन। एवञ्च प्रतीयमानार्थस्य व्यक्तेरनुपपन्नत्वात् अनुमितेश्च ध्वन्यपेक्षया महाविषयत्वात्-प्रधानव्यङ्ग्य- गुणीभूतव्यङ्ग्योभयलक्ष्यव्यापित्वाच्च काव्यानुमितिरेव स्वीकार्या न तु ध्वनिरिति महिमभट्टमतनिष्यन्द:।

साम्प्रतं ध्वनिवादिन: पक्ष: प्रस्तूयते। निमित्तनैमित्तिकभावमवलम्ब्य व्यंग्यव्यञ्जकयोरविनाभावसम्बन्धं समर्थयता अनुमितिवादिना महिमभट्टेन व्यक्तेर्यत्वस्वरूपं दूषितं, तत्स्थाने च लिङ्गलिङ्गिभावप्राणा अनुमिति: सिद्धान्तिता, तन्न समीचीनम्। न हि ध्वनिवादिनां मते व्यक्तेस्तादृश स्वरूपं यादृशं महिम्ना लक्षितम्। व्यंग्यव्यञ्जकयो: निमित्तनैमित्तिकभावो नापह्नूयते ध्वनिवादिना, परं नासावनुमितिपर्यवसायी। **नहि व्यङ्ग्ये प्रतीयमाने वाच्यबुद्धिर्दूरीभवति, वाच्याविनाभावेन तस्य प्रकाशनात्**[1] इत्यत्र ध्वनिकारवाक्येविनाभावशब्द: तार्किकानुकूले व्याप्त्यर्थे न प्रयुक्त:। अत्र अविनाभावस्य सम्बन्धमात्रोऽर्थ इष्ट:। यथा **अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते**[2] इत्यत्राविनाभाव: सम्बन्धमात्रार्थे पर्यवसित:। एवं व्यङ्ग्यव्यञ्जकयोर्निमित्तनैमित्तिकभाव: पारिभाषिकेर्थे नोपादेय:। परमविनाभावस्य सम्बन्धमात्रोऽर्थ एवात्र विवक्षित:।

सदसद्विषया या चतुर्धा व्यक्तिर्महिम्ना प्रतिपादिता तासु घटप्रदीपन्यायेनैव व्यङ्ग्यार्थस्याभिव्यक्तिर्ध्वनिवादिमतानुकूला। नहि कारणात् पयसो दध्यादीनामिन्द्रियविषयतापत्तिर्व्यक्तिरिति केनचित् सुमतिना व्यक्तिलक्षणं सम्प्रतिपद्यते। अत एवात्मीयेन व्यक्तिलक्षणेन लक्ष्यस्य ध्वने: परीक्षा न युक्तियुक्ता। यदपि घटदीपकन्यायेन प्रतीयमानार्थस्य व्यंग्यत्वं ध्वनिवादिन इष्टं तदपि न तथा यथा अनुमानवादिना महिम्ना प्रतिपादितम्। नहि व्यञ्जकेन सहैव व्यङ्ग्यप्रतीतिर्भवतीति ध्वनिवादिन आशय:। प्रत्युत व्यङ्ग्यार्थप्रतीतिसमये व्यञ्जकप्रतीतिरपि न दूरीभवतीति ध्वनिवादिन आशय:। नहि शब्दच्छलेन परकीयं मतं दूषयितुं युक्तम्। यदि

---

1 ध्वन्यालोक., पृ 420

2 काव्यप्रकाश., पृ 50 (पू स.)

SMT. HANSA MEHTA LIBRARY

व्यञ्जकप्रतीतिसमय एव व्यङ्ग्यस्य प्रतीतिर्व्यक्तिवादिन इष्टा स्यात्तदैव व्यक्तिं विदूष्य ध्वनिध्वंसो न्याय्यः, न तु तद्वैपरीत्येन। अतो व्यक्तिवादिनो मते व्यङ्ग्यव्यञ्जकयोर्घटप्रदीपन्यायमूलमवगमनमदूषणमेव। यथा पदार्थद्वारेण वाक्यार्थः प्रतीयते प्रदीपेन च घटः प्रकाश्यते तथैव ध्वनिवादिमते वाच्यार्थावबोधपूर्विका व्यङ्ग्यार्थप्रतिपत्तिः। कार्यकारणभावेनापि व्यंग्यार्थप्रतीतिर्न तथा नियता तथा लिङ्गाल्लिङ्गिज्ञानं नियतम्। केवलं वाच्यार्थ उपायः सन्नौपयिकमर्थं प्रत्याययति, प्रत्याय्यप्रतीतिकाले प्रत्यायकस्यापि प्रतीतिर्न विरमतीति ध्वनिवादिनोऽभिमतम्। तस्मादनेन स्वकृतेन व्यक्तिलक्षणेन ध्वनिध्वंसनमनुचितम्।

यच्चापि महिम्ना नियमेन विभावानुभावव्यभिचारिभिः रसप्रतिपत्तिर्भवतीति रसस्य व्यंग्यत्व विदूष्य तस्यानुमेयत्वं प्रोक्तं तदपि न शोभनम्। यद्यपि रसप्रतीतिकाले क्रमोऽस्ति परमसावलक्ष्यः सूचीभिन्नशतदलवत्। नापि रसप्रतीतौ सम्बन्धस्मरणादिव्यवधानं किञ्चिदनुभूयते यथानुमितौ। निमित्तनैमित्तिकभावस्त्वस्ति, विभावादीनां कारणत्वात् रसस्य च कार्यत्वात्। परं नानेन क्रममूला साध्यसाधनभावावलम्बिनी रसप्रतीतिरिति विनिगमयितुं शक्यम्। विभावानुभावादिभिरास्वाद्यमाना एव रत्यादयो भावाः स्वसंविदानन्दे पर्यवस्यन्तः ब्रह्मानन्दसहोदरं रसरूपिणं परमानन्दमनुभावयन्तीति व्यञ्जकेभ्यो विभावादिभ्यो रसोऽभिव्यक्तो भवति, सम्बन्धस्मरणादिव्यवधानं विनेति रसस्य व्यंग्यत्वं सिद्धं नत्वनुमेयत्वम्।[1]

वस्त्वलङ्कारध्वन्योः प्रतीतिः क्रममूला अस्ति, परं नैतावता तयोरनुमेयत्वं शक्यसम्पादम्। तत्राप्यभिधालक्षणानुमानव्यतिरिक्तस्य व्यञ्जनाव्यापारस्यावश्यमाश्रयणीयत्वात्। नहि वस्त्वलंकाररूप्यर्थः क्रमेण संवेद्य इति तस्यानुमेयत्वं युक्तम्। भ्रम धार्मिक इति पूर्वोक्ते उदाहरणे हेतुदोषादनुमानस्वरूपमेव दूषितं भवतीति भ्रमणाभावरूपिणो व्यङ्ग्यार्थस्यानुमेयत्वं सर्वथाऽनुपपन्नम्। तेन च वस्त्वलंकाररूपिणोरर्थयोरपि व्यंग्यत्वमविरुद्धम्। तत्रापि अभिधालक्षणादिव्यापारस्य प्रवेष्टुमशक्यत्वात्।

---

[1] विभावादिप्रतिपत्त्यनन्तरं रसादिप्रतिपत्तिरिति 'अशक्तास्तत्पद गन्तु ते नो निन्दा प्रचक्रिरे' इति न्यायादनुमानखलीकारपात्रतामस्याभिद्धाना प्रतीतिपरामर्शबाह्यत्वादनादरणीया एव। एवञ्च लिङ्गलिङ्गिभावादपरोऽस्त्येव व्यङ्ग्यव्यञ्जकभाव इति स्थितम्। -भट्टाचार्य शिवप्रसाद, काव्यप्रकाश, श्रीधरकृता काव्यप्रकाशविवेकटीका, पृ 178

यच्चापि महिम्ना 'भ्रम धार्मिके'त्यत्र वस्तुध्वनेरनुमेयत्वं प्रोक्तम्, तदप्यनुमितिस्वरूपमपर्यालोच्यैव। तथाहि निर्दुष्टेन हेतुना नियतस्य साध्यस्य पक्षे सिद्धिरिति सर्वजनाभ्युपगतमनुमितिस्वरूपम्। यदि हेतुर्दुष्टस्तदा पक्षे साध्यस्यानुमितिरपि विदूषिता भवति। अत एवानुमितौ हेतुना सर्वथा निर्दोषेण भाव्यम्।

हेतुत्वञ्च अनुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशब्दज्ञानजनक-साध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वम्। यथा- पर्वतादिपक्षकवह्न्यादिसाधकस्थले धूमादिः। यत्र हेतोर्हेतौ वा आभासाः स हेत्वाभास इति व्युत्पत्तया हेत्वाभासपदस्य हेतुदोष इत्यर्थः। स चानुमितिकारणीभूताभावप्रतियोगियथार्थाानविषयरूपः। यथा-ह्लदो वह्निमान् धूमादित्यस्मिन्नुदाहरणवाक्ये वह्न यथावविशिष्टह्दत्वावच्छिन्नविषयकनिश्चयानन्तरं ह्दो वह्निमान् वह्निव्याप्यधूवांश्चेत्याकारकानुमितेः कदाचिदप्यनुदयात्। एवं ह्दो वह्निमान् धूमादित्यादौ वह्न्यभाववत् ह्दादिरूपो दोषो हेत्वाभासः।[1]

अयं देशः भीरुभ्रमणायोग्यः दृप्तसिंहसद्भाववत्त्वादित्यस्मिननुमाने दृप्तसिंहसद्भावरूपः साध्यस्य भीरुभ्रमणाभावस्यानुमापको हेतुरनैकान्तिको हेत्वाभासः। सव्यभिचारोऽनैकान्तिकः। यथाहि- नित्यः शब्दः प्रमेयत्वात्। अत्रहि प्रमेयत्वं हेतुः। स तु नित्यानित्यवृत्तिः। प्रमेयत्वं नित्येषु अनित्येषु अभयत्र वर्तते इति भावः। पूर्वप्रतिपादितस्यानुमानाकारस्य दुष्टहेतुवशाद्धेत्वाभासाकारस्तु निम्नलिखितप्रकारेण बोध्यः- अयं देशो भीरुभ्रमणायोग्यो दृप्तसिंहसद्भावादित्यनुमितौ राजाज्ञया अन्येन केनचिद् वा कारणेन दृप्तसिंहसद्भावेपि भीरुभ्रमणयोग्यतायाः सम्भवादनैकान्तिको हेत्वाभासः। पूर्वप्रतिपादिते व्याप्तिस्वरूपे हेतुदोषसङ्गमनं यथा- यत्र यत्र दृप्तसिंहसद्भावस्तत्र तत्र भीरुभ्रमणायोग्यत्वमित्यस्या अन्वयव्याप्तेः राजाज्ञया दूषितत्वात्। अपि च पूर्वोक्तेनुमानशरीरे दृप्तसिंहसद्भावरूपो हेतुर्विरुद्धोपि, अस्पर्शत्वादेर्हेतो शुनो बिभ्यतोपि धार्मिकस्योत्साहवशात् मृगयादिकुतूहलेन वा दृप्तसिंहसद्भाववति गोदानदीतटे भ्रमणसम्भवात्। गोदातीरे दृप्तसिंहसद्भावो न प्रत्यक्षप्रमाणेन सिद्धः। पुंश्चल्या वचनमेव तत्र प्रमाणम्। न च तद्वचनं सर्वथा सत्यम्। सुरतसुखविघ्नकोपाकुलायास्तस्या वचनेऽविश्वासात्। अतो गोदातटं भीरुभ्रमणायोग्यं दृप्तसिंहसद्भावादित्यनुमानेऽसिद्धो

---

[1] झलकीकरकृत. न्यायकोश, पृ 1071

हेत्वाभासोपि दृश्यते। एवञ्च यद्भीरुभ्रमणं तद्भयकारणनिवृत्युपलब्धिपूर्वकमिति व्यतिरेव्याप्ते: दूषितत्वादनुमानशरीरं सर्वथा दुष्टम्। तत एव भीरुरुभ्रमणाभावो व्यंग्य एव नत्वनुमेय:।

किञ्च लिङ्गात् यल्लिङ्ग्यनुमीयते, असौ सर्वदा नियत एव। धूमादनुमीयमानोऽग्निस्तदुत्पत्तिसम्बन्धात् सदा नियतरूप:। परं व्यंग्योर्थो न सदानियत:। नापि च तत्प्रत्यायको वाच्योर्थस्तेन सह सदा नियतसम्बद्ध:। परन्तु वक्तृबोव्यकाक्वादीनामुपाधीनां बलादनुभूयमानो व्यंग्योर्थ औपाधिक: सन्ननियतसम्बन्धोपि दृश्यते। अतएव सूर्योऽस्तं गत: इत्यत्र नियताद् वाच्यार्थादुपाधिभेदेन अनियता अनवधयोर्था अवभासन्ते। यदि व्यंग्योर्थोऽनुमेय एव स्यात्तदा धूमाद् यथा वह्निज्ञानं नियतं तथा प्रस्तुताद् वाक्यादपि नियतस्यैवार्थस्य प्रतीति: संभवेत्। परं 'गाव: संह्रियन्ताम् दूरं मा गा: इत्यादयोनवधयोर्था वक्तृबोद्धव्यादीनामुपाधीनां महिम्ना बोद्धरि बोद्धरि भासन्ते। नहि 'सूर्योस्तं गत:' इत्यस्य वाक्यस्य 'गाव: संह्रियन्ताम्' इत्येतावानेव नियतोर्थ: येन तस्यानुमेयत्वं स्यात्। प्रत्युत पूर्वोक्तदिशा वक्तृबोद्धव्यवैशिष्टमहिम्ना असंख्या अर्था: परिस्फुरन्ति। अपि च व्यंग्योर्थो यद्यनुमेय: स्यात्तदा शब्दार्थविषये मिथ्याविवादा एव न प्रवर्त्तेरन्। सर्वस्यार्थस्य अनुमेयत्वेन नियतत्वात्, तत्र च विसंवादानामनवकाशत्वात्। किञ्च व्याप्तिस्मरणादिकल्पनातो व्यञ्जनाया: कारणत्वकल्पनमेवोचितम्। अतस्तुरीययस्यार्थस्य व्यंग्यत्वं सर्वथा सिद्धम्।

ननु मास्तु व्यंग्योर्थोऽनुमितिवेद्य:, परं 'जीवति चात्र गोष्ठयाम् अविद्यमानश्चैत्र: इत्यादौ यथा अर्थापत्या चैत्रस्य गोष्ठ्या बहिर्निवास: सम्भाव्यते, तद्वत् 'भ्रम धार्मिक' इत्यादौ भीरूभ्रमणाभवरूप्यर्थोऽर्थापत्तिप्रमाणवेद्य: स्वीकार्य:, किमनया व्यञ्जनया शशश्रृङ्गायमाणयेति चेन्न, अर्थापत्तिप्रमाणस्याप्यनुमानेऽन्तर्भावात्तत्रापि च व्याप्त्यादिसम्बन्धस्यावश्यमपेक्षणीयत्वात्। अयमाशय:। इह हि द्विविधा अर्थापत्ति:। श्रुतार्थापत्तिरर्थापत्तिश्चेति। यत्रानिुपपद्यमान: शब्द: शब्दान्तरं कल्पयति सा श्रुतार्थापत्ति:। यथा द्वारमिति शब्द: पिधेहीति क्रियापदं कल्पयति। अत: श्रुताच्छब्दस्याध्याहारेश्रुतार्थापत्ति:। यत्र च दृष्ट: श्रुतो वार्थोऽनुपपन्नोऽर्थान्तरं कल्पयति सा अर्थापत्ति:, यथा तत्रैव द्वारमित्यर्थोऽनुपपन्न: पिधेहीत्यर्थ कल्पयति। अतोत्रानुपपन्नादर्थादर्थान्तराध्याहारे कृतेऽर्थापत्ति:। 'पीनो देवदत्तो दिवा न भुंक्ते' इत्यत्र

दिवाभोजनाभाववत् पीनत्वं रात्रिभोजनं विनानुपपन्नमित्यनुपपत्या श्रुतार्थापत्तौ रात्रौ भुंक्ते इति शब्दोऽर्थापत्तौ च तदर्थमात्रं कल्प्यते। एवमर्थापत्तिवशात् रात्रिभोजनवान् देवदत्त: इत्यर्थो गृह्यते। पर्वतो वह्निमान् धूमात् इत्यत्र यथा धूमवह्न्योर्व्याप्त्यादिसम्बन्धं पर्यालोच्य पर्वते वह्निज्ञानं भवति तथैवार्थापत्तावपि रात्रिभोजनवान् देवदत्त: इत्यर्थो व्याप्त्यादिसम्बन्धपर्यालोचनया प्रतीयते। यथा- य: य: पीन: स स भोजनवान्, देवदत्त: पीनोऽतो रात्रौ भोजनवानित्यादिना पीनत्वभोजनत्वयो: व्याप्त्यदिसम्बन्धं पर्यालोच्य दिवा भोजनाभाववतो देवदत्तस्य रात्रिभोजनत्वं कल्प्यते। एवमर्थापत्तिर्नानुमानबाह्या। यतो हि व्यंग्यार्थस्य अनुमेयत्वमेव नोपपद्यते तत एव अनुमानपुच्छभूतया अर्थापत्या असौ ललनालावण्यरमणीयो व्यंग्यार्थ: कथं प्रत्याय्य:। अतोऽवश्यमाश्रयणीयाया: ध्वननवृत्तेरनुमानादिना प्रकारेण खलीकरणप्रयास: सर्वथा दूरमपास्तो भवति।

यच्चापि प्रधानव्यंग्यगौणव्यंग्याभ्यां काव्यस्योत्तममध्यमविभागौ महिमभट्टाचार्येण विप्रतिपद्येते तदपि ध्वनिवादिनामभिप्रायमपर्यालोच्यैव। यद्यपि अखण्डास्वादविषय: काव्यार्थ इत्यत्र नास्ति विप्रतिपत्ति:, परं तथापि विवेकिभिरवान्तरव्यंग्यं वाच्यसमुदायमधिकृत्य जीवितान्वेषणे क्रियमाणे क्वचित् प्रतीयमानं भृत्यवद् वाच्यार्थमेवोपस्कुर्वाणां सत् गुणीभावम् आसादयतीति प्रतीयमानार्थस्य प्राधान्ये ध्वनिर्गौणभावे च गुणीभूतव्यंग्यं काव्यं सहृदयहृदयानुभवबलात् सिद्धम्। उत्तमे ध्वनिकाव्ये प्रतीयमानार्थस्य प्राधान्येनास्वाद:, मध्यमे काव्ये च तस्याप्राधान्येन अन्यादृश्येव चारुता। चारुत्वं तु प्रतीयमानार्थकृतमित्यत्र न विवदामहे। परं प्रतीयमानार्थप्राधान्याप्राधान्येन कृत: काव्यस्योत्तममध्यमभेद: सहृदयहृदयसाक्षिक:। प्रसिद्धं हि लक्ष्यमाश्रित्य लक्षणं प्रवर्तते। अयञ्चोत्तममध्यमव्यवहार: सहृदयहृदयानुभवसिद्धो न केनाप्यह्नूयते। ध्वनिकाव्ये चारुत्वं अधिकं जातं, गुणीभूतव्यंग्ये काव्ये च व्यंग्यार्थस्य गौणभावे चारुता ध्वनिकाव्यापेक्षया लध्वीभूतेति सहृदया एवात्र प्रमाणम्। प्रधानव्यंग्यं यथा हृदयमावर्जयति, न तथा दास्यमनुभवद् राजकलत्रमिव गुणीभूतं व्यंग्यम्। अतएवोत्तममध्यमकाव्यव्यपदेश: परम्पराप्राप्त: प्रत्याख्यातुमशक्य:। तदनुरुध्यैव ध्वनिवादिभि: प्रधानगुणीभूतव्यंग्यमवलम्ब्य काव्यस्योत्तममध्यमविभाग: कृत: इत्थं काव्यवैशिष्ट्ये सिद्धे ध्वनित्वमव्याहतमेव।

महिमभट्टेन ध्वनिं ध्वंसयितुमानन्दवर्धनप्रोक्ते ध्वनिलक्षणे दश दोषा: प्रदर्शिता:। तेषां विवेचनमप्यत्र प्रकृतसंगत्यनुरोधेन प्रस्तूयते।

तत्र-

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।**

इति ध्वनिप्रधानं काव्यलक्षणमानन्दवर्धनाचार्येण व्याहृतम्। एतद्ध्वनिसिद्धान्तसंस्थापकं काव्यलक्षणमधिष्ठाय परवर्तिभिराचार्यैर्महता दाढ्र्येन ध्वनिपक्षः समुपोद्वलितः। महिमभट्टाचार्येण अत्र दश दोषा उद्भाविताः।[1] तत्र महिमभट्टोद्भावितं ध्वनिलक्ष्मणि प्रथमं दूषणम्-

## (1) अर्थस्य विशिष्टत्वम्

आनन्दवर्धनाचार्येण 'यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ' इत्यस्यां कारिकायाम् 'उपसर्जनीकृतस्वार्थौ' इति ध्वनिलक्षणवाक्यघटकं विशेषणं विशेष्यभूतेन शब्दपदेन अर्थपदेन च सहोपात्तम्। 'उपसर्जनीकृतस्वार्थः' इति समस्तपदस्येत्थं विग्रहः कृतोभिनवगुप्तपादाचार्येण स्वकीये ध्वन्यालोकलोचने- **'स्वञ्चार्थश्च तौ स्वार्थौ। तौ गुणीकृतौ याभ्यां यथासंख्येन तेन अर्थो गुणीकृतात्मा, शब्दश्च गुणीकृताभिधेयः।'**[2] अयमाशयः। ध्वनिकाव्ये अर्थः स्वमुपसर्जनीकृत्य शब्दश्च स्वाभिधेयमर्थं गुणीकृत्य प्रतीयमानमर्थं द्योतयतः। तद्यथा- 'भ्रम धार्मिक' इत्यादौ भ्रमेत्यादिनाभिहितो वाच्यार्थः स्वात्मानं गुणीकृत्य निषेधरूपिणं व्यंग्यमर्थ ध्वननबलेन द्योतयति। अतोऽत्रार्थस्य स्वोपसर्जनादुत्तमं ध्वनिकाव्यम्। अथ च

**उन्नतः प्रोल्लसद्धारः कालागुरुमलीमसः।**
**पयोधरभरस्तन्व्याः कं न चक्रेऽभिलाषिणम्।।**[3]

[1] अर्थस्य विशिष्टत्व शब्द सविशेषणस्तद पुस्त्वम्।
द्विवचनवाशब्दौ च व्यक्तिर्ध्वनिर्नाम काव्यवैशिष्ट्यम्।
वचनञ्च कथनकर्तु कथिता ध्वनिलक्ष्मणीति दश दोषा ।। -व्यक्तिविवेक, पृ 1, 23-24
[2] ध्वन्यालोकलोचनम् पृ 103
[3] तत्रैव, पृ 241

इत्यत्र प्रोल्लसद्धारादयश्शब्दाः पीनं मौक्तिकाऽलङ्कृतं तरुणीकुचयुगलरूपिणमर्थं गुणीकृत्य निरन्तरजलवर्षिणं मेघरूपिणमर्थं प्रत्याययन्तो द्वयोरर्थयोर्मिथ उपमानोपमेयभावं ध्वनयन्ति। अतः शब्दाभिहितरुणीकुचयुगलरूपार्थस्योपसर्जनाच्छब्दो व्यंग्यां रूपणामभिव्यनक्तीति ध्वनिकाव्यम्। एवं यत्राभिधेयाथपिक्षया प्रतीयमानार्थस्य प्राधान्येनावस्थानं तत्र ध्वनिरिति निर्गलितार्थः।